CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कालिदासः
मानवशिल्पी महाकविः

डॉ० रेवाप्रसाद द्विवेदी

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कालिदासः
मानवशिल्पी महाकविः

डॉ० रेवाप्रसाद द्विवेदी
काशीहिन्दूविश्वविद्यालये
साहित्यविभागाध्यक्षः

१९७३

प्रकाशिका
संस्कृतपरिषद्, सागरविश्वविद्यालयः
सागरम् (म० प्र०)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सर्वेऽधिकारा ग्रन्थकृदधीनाः

प्रकाशकः संस्कृतपरिषद्, सागरविश्वविद्यालयः

मूल्यम् ~~[illegible]~~ 25/-

प्राप्तिस्थानम् चौखम्बा संस्कृत सीरीज आफिस, वाराणसी
चौखम्बा विद्याभवन, चौक, वाराणसी

मुद्रक
विद्याविलास प्रेस
गोपालमंदिर लेन, वाराणसी–१

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विषय-सूची

क. महाकविलक्षणम्— ९

ख. शरीरशुद्धिः— ११

स्थूलधातुशुद्धिः ११

नारीशरीरे : मुखम् १२

स्तनद्वयम् १५

जघनम् १७

पुरुषशरीरे : उरसो व्यूढता २१

स्कन्धयोरंसलता

भुजयोर्दीर्घता

सूक्ष्मधातुशुद्धिः २४

स्त्रीसारम् : उत्तमगर्भधातृत्वम् २४

अङ्गवर्णनप्रयोजनम् २६

पुरुषसारम् : इन्द्रजित्त्वम् ३०

कालिदासचित्रचयने डाकतारविभागस्य दोषः ३१

ग. मतिशुद्धिः— ३४

सप्त धीगुणाः ३४

प्रतिभा : नन्दिनी गौः ३६

प्रतिभायुक्ता व्युत्पत्तिः ३७

व्युत्पत्तियुक्ता प्रतिभा ३७

घ. स्वभावशुद्धिः— ३८

संयमः

धैर्यम्

अधिकारमर्यादा

ङ. जन्मशुद्धिः— ४२

रघोः संभवे दिलीपतपः ४३

भरतस्य संभवे शकुन्तलातपः ४७

कालिदासस्य विशेषः— ४९

मानवस्य देवाधिको महिमा ४९

कुमारसंभवत्रयम् ५३

मानवस्य मृत्युञ्जयत्वम् ५४

दर्शनम् ६५

कविकर्मणि सूक्ष्मता ६८

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

संकेताः

कु०, कुमा०	कुमारसम्भवम्
र०, रघु०	रघुवंशम्
मे०	मेघदूतम्
शा०	अभिज्ञानशाकुन्तलम्
वि०	विक्रमोर्वशीयम्
मा०	मालविकाग्निमित्रम्
नै०	नैषधीयचरितम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ विक्रमविश्वविद्यालये, सागरविश्वविद्यालये च यू० जी० सी०-व्याख्यानेभ्य आमन्त्रितो डॉ० रेवाप्रसादद्विवेदी कालिदाससाहित्यमप्यवलम्ब्य कानिचिद् व्याख्यानानि कृतवान्। तेषामेव सारमत्र संक्षिप्य प्रस्तवीमहि।

यो हि मानवदेवो भवति, यश्च युगावश्यकतापूर्त्तिमन्त्रं कवते, यत्र धर्मो नीतिः दर्शनं चेति त्रितयमप्येकरसीभवति, यश्चाप्यर्थं शिल्पति स एव कविर्महाकविरिति चात्र विदुषोऽस्य प्रतिपत्तिः ॥

प्रबोधिनी ११
२०३०
सागरविश्वविद्यालयः

रामजी उपाध्यायः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शुद्धेश्चतुष्टयीं नौमि धर्मस्येव चतुष्पदीम् ।
मर्त्येऽप्यमर्त्यतां सूते या मनुष्यकलेवरे ॥

कवीनां गणनाप्रसङ्ग इव महाकवीनां गणनाप्रसङ्गेऽपि कालिदासः कनिष्ठिकाधिष्ठित[1] एव । अतएव–

'एतस्मिन्नतिविचित्रकविपरम्परावाहिनि संसारे कालिदास-प्रभृतयो द्वित्राः पञ्चषा वा महाकवय इति गण्यन्ते—'

इति ध्वनिप्रस्थानपरमाचार्यस्यानन्दवर्धनस्योद्गारः [ध्वन्यालोक-१.६ वृत्त्यन्ते]। अस्ति चात्र सर्वेषामपि संप्रतिपत्तिर्महिमाचार्यप्रभृतीनाम्[2] । अत्र विचार्यम् 'किन्तु स्वालक्षण्यं महाकवेरि' ति । तत्र ध्वनिकारः

'उपसर्जनीकृतशब्दार्थकप्रतीयमानार्थस्य तदभिव्यञ्जनक्षम-शब्दार्थविशेषस्य च सन्निवेशक्षमा महाकवित्वमि'–ति । तदुक्तम्–

सोऽर्थस्तद्व्यक्तिसामर्थ्ययोगी शब्दश्च कश्चन ।
यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ [3]महाकवेः ॥ इति ।

वाच्यानां वाचकानां च यदौचित्येन योजनम् ।
रसादिविषयेणैतत् कर्म मुख्यं [4]महाकवेः ॥ इति च ।

किन्तु, एवं सति स्थितम्—

---

१. 'पुरा कवीनां गणनाप्रसङ्गे कनिष्ठिकाधिष्ठितकालिदासा'—अत्र 'महाकवीनां गणने'ति समुचितम् ।

२. व्यक्तिविवेके द्वितीयविमर्शस्यान्ते ।

३. ध्वन्यालोक—१. ६

४. ध्वन्यालोक—३. ३२

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भ्रम धम्मिअ वीसद्धो स सुनओज्ज मारिओ देण ।
गोलाणई-कच्छकुडङ्गवासिणा दरिअसीहेणे ॥-ति

गाथाकवेरपि महाकवित्वम्, अप्रधानेन विधिना प्रधानीभूतस्य निषेधस्यात्र व्यञ्जनया प्रतीयमानत्वात्। एवमेव नितान्तजुगुप्सितार्थकस्य—

[2]विपरीतरते लक्ष्मीर्ब्रह्माणं दृष्ट्वा नाभिकमलस्थम् ।
हरेर्दक्षिणनयनं रसाकुला झटिति स्थगयती ॥-ति

गाथापद्यस्यापि कवौ स्थितमेव महाकवित्वम्, प्रतीयमानार्थपरम्पराया अत्र कदलीपत्रगर्भन्यायेन कृतपदत्वात्। किञ्चेमामेकामपि गाथां रचितवानपि कविर्महाकविरेव भवदभिमतमहाकविलक्षणाक्रान्तत्वात्। [3]उक्तिकविरेष, न महाकविरिति तु राजशेखरः, तन्मते 'अन्यतरप्रबन्धनिपुणत्वस्यैव महाकवित्वात्'। नास्ति च राजशेखरमतमतिसमञ्जसम् 'भाणमात्रकवेरपि महाकवित्वेन व्यपदेष्टुं शक्यत्वात्। ननु सर्गबन्धकविरेव महाकविरिति चेत् एवं सति 'नीतिसार'-रचयिता कामन्दकोऽपि महाकविः, नीतिसारस्य सर्गनामकाध्यायबद्धत्वात्। ननु 'यस्य काव्यं विविधान् शास्त्रार्थान्, विविधानि शिल्पानि, विविधा भाषा, विविधाः कलाः सार्वभौमं पाण्डित्यं च नितान्तनेदीयस्तया बिभर्त्ति स एव महाकविरि'-ति

'न[5] तज्ज्ञानं न तच्छिल्पं न तच्छास्त्रं न सा कला ।
जायते यन्न काव्याङ्गमहो भारो महान् कवेः ॥'

इति भरत-भामहोदाहृतदिशा निष्पन्नस्यैव काव्यविशेषस्य कर्तृत्वं महाकवित्वमिति चेद्, एवं सति कालिदासोऽप्यमहाकविः, तस्यापि काव्येषु तुरुष्कभाषाया अभावात्, संस्कृतम्, प्राकृतम्, अपभ्रंशश्चेति तिसृणामेव भाषाणां कालिदासकाव्येषु लाभात्। ननु कः समाधिरिति चेत् 'दुष्करमिदं यन्महाकविलक्षणं नाम। मार्गं तु कञ्चन लिप्सामहे। अथ—

---

१. ध्वन्यालोकव्यक्तिविवेककाव्यप्रकाशादिषु ध्वनिस्थलत्वेनोदाहृता गाथा ।

२. काव्यप्रकाशे वस्तुनो वस्तुध्वनिरिति भेदायोदाहृता गाथा ।

३–४. काव्यमीमांसा ४

५. काव्यालङ्कारे भरतनाट्यशास्त्रे च समानार्थिका कारिका ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'महाभारत'-मिति नाम्नि 'महच्छब्दः' किमर्थकः ?

ननु 'महत्त्वाद् भारवत्त्वाच्च महाभारतमुच्यते' इति स्वयं महाभारत एवास्योत्तरमिति चेत्,

सर्गबन्धो महाकाव्यं महतां च महच्च यत्।[1]

इति भामह एव महाकाव्यस्यापि लक्षणमिति गृहाण। अधुना 'महत्त्वं नाम किमि'-त्यध्यवसेयम्। अत्रैवं प्रतिपद्यामहे–

'मानवात्मनि शरीरम्, इन्द्रियाणि, मनः, बुद्धिश्चैतन्यमि' ति यानि घटकानि तेषु पुरुषार्थचतुष्टयवर्त्मना समुपार्ज्यमानं यत् संस्कृतत्वं तस्यैव प्रतीयमानाद्यर्थचमत्कारप्राधान्येन सर्गबन्धेषु य उपश्लेषः, तन्महत्त्वम्, तन्निष्ठया जन्यतया चानुमेयं यज्जनकतावच्छेदकं तन्महाकवित्वमि' ति।

नास्त्यत्र भाषाप्रतिबन्धः साहित्यदर्पणाद्युक्तः, 'उक्तिविशेषः काव्यं भाषा या भवति सा भवत्वि' ति कविराजेन राजशेखरेण विहितस्यैव वर्त्मनोऽत्र समादरणीयत्वात्। अत एव 'महतामि'–ति विशेषणम्। 'महतां महात्मनां, महापुरुषाणामि'–ति तदर्थः। ये च महापुरुषास्ते प्रसिद्धा एव रामयुधिष्ठिरादयः। निक्षिप्ततमं तेषु सर्वविधमपि मानवीयं संस्कृतत्वं, तदाश्रितं महत्त्वं च। अत एव चाश्वघोषः, भारविः, माघः, श्रीहर्षः इत्येते महाकवयः। अस्ति चैतस्य सर्वस्यापि कविकुलस्य गुरुः कालिदासः। स हि मानवीयां संस्कृतिलतां यथावदनुपालयति, किन्तु ततोऽधिकमपि किञ्चिदुपनिबध्नाति। तथाहि—

१. शरीरशुद्धिः

स्थूलधातुशुद्धिः

अद्यत्वे यदेव संस्कृतत्वसंस्कृतिपदाभ्यामुच्यते तस्यैव प्राचीना रूढिः शुचितेति। सेयं शुचिता शुद्धिपदेनाप्युदीर्यते। शुद्धिश्चेयं कालिदासेन क्रियासमभिहारेणोपनिबध्यते। तथाहि वैवस्वतस्य मनोर्वंशं वर्णयता तेन रघुवंशस्यारम्भ [१. १२] एवोदीर्यते—

---

१. काव्यालङ्कारे महाकाव्यापरपर्यायसर्गबन्धनामककाव्यलक्षणे।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः ।
दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव ।। इति ।

अत्र क्षीरचन्द्रयोरुपमात्वेन शुद्धिरियं मूर्त्तिमिवासादिता सुकविना । सेयं शुद्धिः शरीरधातु-मति-स्वभाव-जन्मात्मकस्कन्धचतुष्टयेन प्रविभज्य प्रस्तूयते कालिदासेन । तत्र शरीरपदेनात्र स्थूलमेव शरीरं गृह्यते । मानवप्रकृतौ तद् द्विधा विभक्तम्–'नरत्वेन नारीत्वेन' च । तत्र यत्

नारीशरीरं

तस्य शुद्धिसंस्कारे कालिदासो निपुणतरं दष्टदृष्टिः । तत्र पार्वती तस्यादर्शभूता नारी । यद्यपि शकुन्तला, यक्षी, मालविका, उर्वशी चेति तदतिरिक्ता स्त्रितमा अपि नानीदृश्यः । नार्याः शरीरे स्त्रीत्वव्यञ्जकानि यान्यङ्गानि तेषु तत्संस्कारेषु च निध्यायतितमामसौ सुमतिः । मुखं, स्तनौ, जघनं चेति तान्यङ्गानि येषु व्यतिषजते नारीत्वं व्यतिरिच्यते च पुंस्त्वात् । तत्र

मुखम्

मुखस्य संस्कारः कान्तिविशेषः, प्रसन्नता च । तत्र कान्तये चन्द्रः, प्रसन्नतायै च पद्मं मुखस्य प्रसिद्धे प्रतिमाने । अनयोर्द्वयोरपि सामञ्जस्यं कुर्वाणः कालिदासो व्यतिरेकविधया पार्वतीमुखं चित्रयति—

चन्द्रं गता पद्मगुणान् न भुङ्क्ते पद्माश्रिता चान्द्रमसीमभिख्याम् ।
उमामुखं तु प्रतिपद्य लोला द्विसंश्रयां प्रीतिमवाप लक्ष्मीः ।।

कु. १. ४३ इति ।

पद्मौपम्येन मुखगतं सौरभमपि व्यज्यते पद्मिनीत्वव्यञ्जकम् , व्यज्यते च कपालकपोलचिबुकाक्षिनासिकानामपि सुश्लिष्टता, शोभनाकृति-व्यञ्जिका । किन्तु एतत्सर्वमपि गौणमेव, प्रधानमत्र द्वयमेव, एकं कान्ति-मत्त्वम् , अपरं च प्रसादसुभगत्वम् । अत एव—

तथातितप्तं सवितुर्गभस्तिभिर्मुखं तदीयं कमलश्रियं दधौ ।। इति,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मुखेन सा पद्मसुगन्धिना निशि प्रवेपमानाधरपत्रशोभिना ।
तुषारवृष्टिक्षतपद्मसम्पदां सरोजसन्धानमिवाकरोदपाम् ॥

कु. ५. २१, २७, इति च,

मुहुर्मुहुः पद्ममेव स्मरति महाकविः, स्मरति च—

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः
शृङ्गारैकरसः स्वयं नु मदनो, मासो नु पुष्पाकरः ॥

इत्युर्वशीशरीरे कान्तिविशेषप्राजापत्ये चन्द्रमेव [वि० १. १०] अभिषिञ्चति च मालविकामुखकान्तिसादृश्यप्रतिकर्मणि चन्द्रमेव शरत्कालिकम्—

'दीर्घाक्षं शरदिन्दुकान्ति वदनम्' [मा० २. ३] इति,

अतएव च—

दिने दिने सा परिवर्धमाना लब्धोदया चान्द्रमसीव लेखा ।
पुपोष लावण्यमयान् विशेषान् ज्योत्स्नान्तराणीव कलान्तराणि ॥

कु० १. २५—इति,

द्वयं गतं संप्रति शोचनीयतां समागमप्रार्थनया कपालिनः ।
कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी ॥

कु० ५. ७१

इति च कालिदासश्चन्द्रमेव, तद्गतां कान्तिमेव च लावण्यापरपर्यायां कण्ठरवेण स्पृशति पार्वत्या उपमानिष्पत्तये । हेमकूटगता उर्वशीसख्य उर्वशीमुखमुपप्लवान्मुक्तं चन्द्रमिवोत्सुकनयनाः पश्यन्ति—

एताः सुतनु मुखं ते सख्यः पश्यन्ति हेमकूटगताः ।
उत्सुकनयना लोकाश्चन्द्रमिवोपप्लवान्मुक्तम् ॥

वि० १. १२

सेयमुर्वशी मोहेन मुक्तकल्पा सती 'तमसा मुच्यमाना प्रकटितचन्द्रा निशेव लक्ष्यते [वि० १. ६] ।

न केवलं स्त्रीणामेव, पुरुषाणामपि मुखानि कालिदासश्चन्द्रपद्माभ्यामेवोपमिमीते । तथाहि—'रघोः प्रसादसौम्ये मुखे विशदप्रभे चन्द्रे च चक्षुष्मन्तः समरसप्रीतयः'—

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'प्रसादसुमुखे तस्मिंश्चन्द्रे च विशदप्रभे ।
तदा चक्षुष्मतां प्रीतिरासीत् समरसा द्वयोः ॥'

४. १८

एवमेव 'ग्रीष्मस्य संतापिषु दिवसेषु द्वौ तापापनोदक्षमपादसेव्यौ, सविशेषकान्तौ च बभूवतुः, कुशः चन्द्रश्चे'-ति । तदुच्यत एतेन [र. १६. ५३]—

जनस्य तस्मिन् विगाढे बभूवतुर्द्वौ सविशेषकान्तौ ।
तापापनोदक्षमपादसेव्यौ स चोदयस्थो नृपतिः शशी च ॥

सुप्तप्रबुद्धस्याजस्य मुखं विडम्ब्यैव चन्द्रो लक्ष्मीं विनोदयितुं क्षमते—

निद्रावशेन भवताऽप्यनवेक्ष्यमाणा
पर्युत्सुकत्वमबला निशि खण्डितेव ।
लक्ष्मीर्विनोदयति येन दिगन्तलम्बी
सोऽपि त्वदाननरुचिं विजहाति चन्द्रः ॥

रघु० ५. ६७

अतएव च—

तद् वल्गुना युगपदुन्मिषितेन तावत्
सद्यः परस्परतुलामधिरोहतां द्वे ।
प्रस्पन्दमानपरुषेतरतारमन्त-
श्चक्षुस्तव प्रचलितभ्रमरं च पद्मम् ॥

रघु० ५. ६८

वृन्तश्लथं हरति पुष्पमनोकहानां
संसृज्यते सरसिजैररुणांशुभिन्नैः ।
स्वाभाविकं परगुणेन विभातवायुः
सौरभ्यमीप्सुरिव ते मुखमारुतस्य ॥

रघु० ५. ६९ इति

मुखगतयोर्नेत्रसौरभ्ययोरपि कृते पद्ममेव स्मरति महाकविरजप्रबोधे ।

अत एव च मालविकायाः किञ्चिदभिव्यक्तदशनशोभि स्मयमानं च मुखम् असमग्रलक्ष्यकेसरेणोच्छ्वसता च पङ्कजेन तुल्यम्—

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्मयमानमायताक्ष्याः किञ्चिदभिव्यक्तदशनशोभि मुखम् ।
असमग्रलक्ष्यकेसरमुच्छ्वसदिव पङ्कजं दृष्टम् ॥

मा० २. १०

अत एव च संगमनीयेन मणिना विभूषितम् उर्वश्याश्चतुरस्रं मुखं बालातपरक्तं कमलमनुहरति—

स्फुरता विच्छुरितमिदं रागेण मणेर्ललाटनिहितस्य ।
श्रियमुद्वहति मुखं ते बालातपरक्तकमलस्य ॥

वि० ४. ७४

यवनीनां मुखे मदरागोऽपि पद्मे बालातप इवैव रम्यः—

यवनीमुखपद्मानां सेहे मधुमदं न सः ।
बालातपमिवाब्जानामकालजलदोदयः ॥

रघु० ४. ६१

अतएव निवातपद्मस्तिमितेन चक्षुषा सुतस्य चन्द्रवत् कान्तं मुखं पिबतो दिलीपस्यापि प्रहर्षो गुरुः—

निवातपद्मस्तिमितेन चक्षुषा
नृपस्य कान्तं पिबतः सुताननम् ।
महोदधेः पूर इवेन्दुदर्शनाद्
गुरुः प्रहर्षः प्रबभूव नात्मनि ॥

रघु० ३. १७

एवमेवास्य 'सकलेन्दुमुखी, अबालेन्दुमुखी, इन्दुवदने'-त्यादयोऽप्युक्तयः ।

स्तनद्वयम्

नारीणां स्तनौ प्रवृद्धावेव सन्तौ कालिदासं रञ्जयतः, न हीनौ । अत एवासौ नह्येव तृप्यति तौ पौनःपुन्येन वर्णयन् । पार्वतीस्तनौ तथा प्रवृद्धौ यदिमावन्योन्यमुत्पीडयतः तथा च संश्लिष्टौ यदनयोर्मध्ये मृणालसूत्रमपि न शेकेऽवकाशलेशमप्यर्जितुम् [कु. १. ४०]—

अन्योन्यमुत्पीडयदुत्पलाक्ष्याः स्तनद्वयं पाण्डु तथा प्रवृद्धम् ।
मध्ये यथा श्याममुखस्य तस्य मृणालसूत्रान्तरमप्यलभ्यम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रथमोदबिन्दवः पार्वत्याः समाधियोगकालेऽधरोष्ठतटात् पयोधरोत्सेधे निपत्य भृगुपातभङ्गिमानमर्जयन्ति [कु. ५. २४]—

स्थिताः क्षणं पक्ष्मसु ताडिताधराः
पयोधरोत्सेधनिपातचूर्णिताः ।
वलीषु तस्याः स्खलिताः प्रपेदिरे
चिरेण नाभिं प्रथमोदबिन्दवः ॥

प्रतिकूलवादिनि द्विजातौ प्रवेपमानाधरलक्ष्यकोपायाः पार्वत्या 'इतो गमिष्यामी'-ति निवृत्त्यध्यवसाये स्तनयोरुत्सेध एव वल्कलसंहितां भिनत्ति [कु. ५. ८४]—

इतो गमिष्याम्यथवेति वादिनी
चचाल बाला स्तनभिन्नवल्कला ॥

रघुवंशस्य माता सुदक्षिणा यदा पक्वगर्भा संवृत्ता तदा तस्या आनीलमुखं नितान्तपीवरं च स्तनद्वयं भ्रमराभिलीनयोः सुजातयोश्च पङ्कजकोषयोः श्रियं तिरस्कुरुते [रघु. ३. ८]—

दिनेषु गच्छत्सु नितान्तपीवरं
तदीयमानीलमुखं स्तनद्वयम् ।
तिरश्चकार भ्रमराभिलीनयोः
सुजातयोः पङ्कजकोषयोः श्रियम् ॥

मलयदर्दुरौ दक्षिणस्या दिगङ्गनायाः प्रवृद्धौ स्तनावेव—

स निर्विश्य यथाकामं तटेष्वालीनचन्दनौ ।
स्तनाविव दिशस्तस्याः शैलौ मलयदर्दुरौ ॥ ४. ५१

अबलाविप्रयुक्तः कामी च मेघदूतयक्षः स्निग्धवेणीसवर्णेन मेघेनारूढं परिणतफलद्योति-काननाम्रच्छन्नोपान्तमाम्रकूटं गर्भिण्या भूकुटुम्बिन्याः शेषविस्तारपाण्डुं श्याममध्यं च स्तनमेव पश्यति—

छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रै-
स्त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे ।
नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां
मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः ॥ १. १८

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्तनप्रवृद्धिमेवात्र सर्वत्रापि पश्यति महाकविः। अत एव च मालविकामप्यसौ निबिडोन्नतोरस्कां निरूपयति [मा. २. ३]—

दीर्घाक्षं शरदिन्दुकान्तिवदनं बाहू नतावंसयोः
संक्षिप्तं निबिडोन्नतस्तनमुरः पाणी प्रमृष्टाविव ॥ इति

अमुमेव च विशेषं विक्रमोर्वशीये परिणाहपदेनापि निरूपयन् सुकविरेष हृदयकम्पनिर्वर्णनव्याजेन प्रस्तवीति [वि० १. ७]—

मन्दारकुसुमदाम्ना गुरुरस्याः सूच्यते हृदयकम्पः।
मुहुरुच्छ्वसता मध्ये परिणाहवतोः पयोधरयोः ॥ इति।

जघनभागः

ऊरुद्वयं नाभिं चावधीकृत्य राजमानः कामिन्याः पुरोवर्त्ती मध्यभागो जघनपदेन [1]पृष्ठवर्त्ती च स एव नितम्बपदेनोदीर्यते। अनयोर्जघनभागः कालिदासस्य प्रेष्ठः। तमसौ 'मध्य'पदेनापि निबध्नाति। अङ्गस्यास्य घनत्वमुन्नतत्वं च संस्कृतसाहित्ये प्रतीतम्। घनत्वमस्य जघनपदेनापि स्पष्टम्। उन्नतत्वाय चात्र वेदिकोपमामुपासते सुकवयः। तथा च कालिदास एव पार्वतीं वर्णयन्नभिव्यनक्ति [कु. १. ३९]—

मध्येन सा वेदिविलग्नमध्या
वलित्रयं चारु बभार बाला।
आरोहणार्थं नवयौवनेन
कामस्य सोपानमिव प्रयुक्तम् ॥

अत्र प्रथमं मध्यपदमुदरभागपरम्, द्वितीयं तु जघनपरमेव। नितम्बसचिवस्यास्य भागस्य परिपुष्टिं विपुलाभोगतां च कविरसकृत् परामृशति श्रोणिपदेन नितम्बं जघनं चेति द्वितयमप्यादाय। तथाहि—मेघेन यक्षपत्नी स्तनाभ्यां स्तोकनम्रा श्रोणीभाराच्चालसगमना दृश्यते—

---

१. कालिदासे जघननितम्बयोस्तु विभागो विपर्यस्तोऽपि दृश्यते।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तन्वी श्यामा शिखरिदशना पक्वबिम्बाधरोष्ठी
मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः ।
श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां
या तत्र स्याद् युवतिविषये सृष्टिराद्येव धातुः ।।

उ० मे०

हिमगिरौ शिलीभूतहिमे मार्गे अङ्गुलिपार्ष्णिभागानुद्वेजयत्यपि अश्वमुख्यः किन्नरस्त्रियः दुर्वहश्रोणिपयोधरार्त्ताः सत्यो मन्दां गतिं न भिन्दन्ति [कु. १. ११]—

उद्वेजयत्यङ्गुलिपार्ष्णिभागान् मार्गे शिलीभूतहिमेऽपि यत्र ।
न दुर्वहश्रोणिपयोधरार्त्ता भिन्दन्ति मन्दां गतिमश्वमुख्यः ।।

शकुन्तलायाः पदपङ्क्तिः पाण्डुसिकते लताकुञ्जद्वारे पुरस्तादभ्युन्नता, पश्चाच्चावगाढा दृश्यते । अत्र क्रमभेदे कारणं जघनगौरवमेव [श. ३. ६]–

अभ्युन्नता पुरस्तादवगाढा जघनगौरवात् पश्चात् ।
द्वारेऽस्य पाण्डुसिकते पदपङ्क्तिर्दृश्यतेऽभिनवा ।।

मालविकाया जघनं नितम्बि [मा. २. ३], शकुन्तलायाश्च यातं नितम्बयोर्गुरुतया मन्दमिति [शा. २. २]—

'मध्यः पाणिमितो नितम्बि जघनम्' इति
'यातं यच्च नितम्बयोर्गुरुतया मन्दम्' इति च

तत्तस्मात् सन्दर्भाद् विज्ञातचरमेव, विज्ञातचरमेव च मालविकाया एव

विपुलं नितम्बदेशे मध्ये क्षामं समुन्नतं कुचयोः ।
अत्यायतं नयनयोर्मम जीवितमेतदायाति ।।

मा० ३. ७

इति वर्णनरत्नेन ।

नितम्बभागस्तथा समुन्नतोऽभिप्रेयते यथानेन पर्वतोऽप्यवाप्त-सादृश्यबहुमानो जायेत । अत एव दक्षिणस्या दिशः स्तनाविव मलय-दर्दुरौ शैलौ यथाकामं निर्विश्य दिग्जिगीषू रघुरसह्यविक्रमत्वेन हेतुना

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मेदिन्याः स्रस्तांशुकं नितम्बमिव समुद्रेण दूरान्मुक्तं सह्यनामानं शैल-मारोहति—

असह्यविक्रमः सह्यं दूरान्मुक्तमुदन्वता ।
नितम्बमिव मेदिन्याः स्रस्तांशुकमलङ्घयत् ॥

रघु० ४. ५२

मुखस्तनजघनानां कान्ति-प्रवृद्धि-विपुलता नारीशरीरस्य स्वास्थ्य-व्यञ्जका गुणाः । स्वस्थस्य नारीशरीरस्य सर्वावयवानवद्यताऽपि कालि-दासस्य [कु० ३. ५७]—

तां वीक्ष्य सर्वावयवानवद्यां रतेरपि ह्रीपदमादधानाम् ।
जितेन्द्रिये शूलिनि पुष्पचापः स्वकार्यसिद्धिं पुनराशशंसे ॥

इत्येवं प्रिया । एतामेव सर्वावयवानवद्यतां प्रथमसर्गे

उन्मीलितं तूलिकयेव चित्रं सूर्यांशुभिर्भिन्नमिवारविन्दम् ।
बभूव तस्याश्चतुरस्रशोभि वपुर्विभक्तं नवयौवनेन ॥

१. ३२

इत्यतः परम्—

लज्जा तिरश्चां यदि चेतसि स्यादसंशयं पर्वतराजपुत्र्याः ।
तं केशपाशं प्रसमीक्ष्य कुर्युर्वालप्रियत्वं शिथिलं चमर्यः ॥

१. ४८

इति पद्यं यावच्च प्रतिप्रतीकं व्यावर्ण्य पर्यवसाने—

सर्वोपमाद्रव्यसमुच्चयेन
यथाप्रदेशं विनिवेशितेन ।
सा निर्मिता विश्वसृजा प्रयत्ना-
देकस्थसौन्दर्यदिदृक्षयेव ॥ १. ४६

इत्येवं तामेव (सर्वावयवानवद्यतां) विधातुरेकस्थसौन्दर्यदिदृक्षौपयिक-प्रयत्नप्रतिपद्यमानशिल्पसौभाग्यसंभावनामन्दपरिस्पन्देन संभावयते ।

या तत्र स्याद् युवतिविषये सृष्टिराद्येव धातुः ।

उ० मे०

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः ॥
शाकु० २. ६

आभरणस्याभरणं प्रसाधनविधेः प्रसाधनविशेषः ।
उपमानस्यापि सखे प्रत्युपमानं वपुस्तस्याः ॥
वि० २. ३

इत्येवं च ताभिस्ताभिः परिस्पन्दसुभगाभिर्भङ्गिभिः स्त्रीशरीरवैभवमसकृदेव प्रतिपादयति महाकविरेषः ।

नारीशरीरगताः सात्त्विकादयो भावा अपि कवेरस्य प्रियाः । तानसौ तथा निपुणतया प्रत्युपस्थापयति लक्षणकारास्ततो 'भिक्षन्तेतरां सौख्येनैव यथा[1] । शृङ्गारप्रकाशरसार्णवसुधाकरप्रभृतिष्वपि ता वैपुल्येन द्रष्टुं शक्यन्ते ।

नारीशरीरस्य तदवयवविशेषाणां चामी विशेषाः संस्कृतसाहित्ये नितान्तं प्रियाः । दण्डि-बाण-सुबन्धु-हर्ष-माघ-श्रीहर्षप्रभृतिषु नितान्तमेव सूक्ष्मतामेतेषां वर्णनेयमवाप्ता । नखशिख-शिखनख-वर्णनानि शृङ्गाररसस्य विभावने नितान्तमभ्यर्हितानि संवृत्तानि । अतएव

चिकुरप्रकरा जयन्ति ते विदुषी मूर्धनि सा बिभर्ति यान् ।
पशुनाप्यपुरस्कृतेन तत्तुलनामिच्छतु चामरेण कः ॥

[नै० २. २०] इत्यत आरभ्य नैषधीयचरितकविरपि

हृतसारमिवेन्दुमण्डलं दमयन्तीवदनाय वेधसा ।
कृतमध्यविलं विलोक्यते धृतगम्भीरखनी-ख-नीलिम ॥'

[नै० २. २५]—इत्येवमिन्दुमण्डलेन,

सुषमाविषये परीक्षणे निखिलं पद्ममभाजि तन्मुखात् ।
अधुनापि न भङ्गलक्षणं सलिलोन्मज्जनमुज्झति स्फुटम् ॥

---

१. तामिमां सम्पदं डॉ० रामजी उपाध्याया 'महाकविकालिदास' इति नामके तेषां सन्दर्भे १०९-११० पृष्ठयोर्लेशेन प्रतिपादितवन्तः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

[नै० २. २७] इत्येवं च विकचपद्मकोषेण मुखम् ,

कलशे निजहेतुदण्डजः किमु चक्रभ्रमकारितागुणः ।
स तदुच्चकुचौ भवन् प्रभाभ्ररचक्रभ्रममातनोति यत् ॥
नै० २. ३२

भजते खलु षण्मुखं शिखी चिकुरैर्निर्मितबर्हगर्हणः ।
अपि जम्भरिपुं दमस्वसुर्जितकुम्भः कुचशोभयेभराट् ॥
नै० २. ३३

इत्येवं चक्रवाकमिथुनेन कलशेन चोच्चेतिविशेषणविशिष्टौ कुचौ,

पृथुवर्तुलतन्नितम्बकृन्मिहिरस्यन्दनशिल्पशिक्षया ।
विधिरेककचक्रचारिणं किमु निर्मित्सति मान्मथं रथम् ॥
नै० २. ३६

इत्येवं च पृथुवर्तुलौ नितम्बौ रथचक्रेण उपमिमानः एतेषामङ्गानामेतेमेवोपमानानां दण्डयादिगतां प्राचीनां परम्परां व्यतिरेकविधया प्रस्तवीति । दण्डी हि 'अतिघनं जघनं जैत्ररथं, स्तनद्वयं दिग्विजययात्रामङ्गलपूर्णकुम्भद्वयं, मुखं च तथैव शरदिन्दुम'–भिख्यापयति वसुमतीशरीरशरणागत्युत्प्रेक्षाविधया । अस्ति च प्रसिद्धिः—

स्वल्पं निर्मितमाकाशमनालोच्यैव वेधसा ।
इदमेवंविधं भावि भवत्याः स्तनजृम्भणम् ॥

इति सुभाषितेषु,

प्रौढिप्रकर्षेण पुराणरीतिव्यतिक्रमः श्लाघ्यतरः कवीनाम् ।
अत्युन्नतिस्फोटितकञ्चुकानि वन्द्यानि कान्ताकुचमण्डलानि ॥

[विक्रमाङ्कदेवचरिते–१. १५—] इति च महाकाव्येषु नारीशरीरे स्तनानामतिप्रवृद्धेः । शालभञ्जिकादीनां प्रयागखजूरवाहादिमन्दिरोत्कीर्णेष्वपि च सैव गतिः मुखस्तनजघनानाम् । तदिदं नारीशरीरम् । अथ पुरुषशरीरम् ।

पुरुषशरीरे

पुरुषशरीरे उरः, स्कन्धौ, भुजद्वयं चेति सविशेषं वर्ण्यमाना विशेषाः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एतेषु उरसो व्यूढता, स्कन्धयोर्मांसलता, भुजयोश्च व्यायतता पुरुष-शरीरे महाकवीनां प्रियाः। एताश्च तिस्रोऽपि महाकविः कालिदासो दिलीप-शरीरवर्णन एवं संगृह्णाति—

व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः।
आत्मकर्मक्षमं देहं क्षात्रो धर्म इव श्रितः॥ इति १. १३

अत्र 'आत्मकर्मक्षमता' हि देहस्य लक्षणम्। रघुमपि वर्णयन् सुकविरेष तत्तदङ्गानामेतानेव विशेषान् उपनिबध्नाति [रघु. ३. ३४]—

युवा युगव्यायतबाहुरंसलः कपाटवक्षाः परिणद्धकन्धरः।
वपुःप्रकर्षादजयद् गुरुं रघुस्तथापि नीचैर्विनयाददृश्यत॥

अत्र उरसो व्यूढतायां कपाटौपम्येन विस्तारोऽपि निक्षिप्तः। माघोऽपि 'कपाटविस्तीर्णमनोरमोरःस्थलस्थितश्रीललनस्य तस्य।'

इति भगवन्तं श्रीकृष्णं कपाटविस्तीर्णमनोरमोरःस्थलं पश्यति, श्रीहर्षश्च—

अमुष्य दोर्भ्यामरिदुर्गलुण्ठने ध्रुवं गृहीतार्गलदीर्घपीनता।
उरःश्रिया तत्र च गोपुरस्फुरत्कपाटदुर्धर्षतिरःप्रसारिता॥

[नै. १. २२] इत्येवं नलं कपाटदुर्धर्षतिरःप्रसार्युरःस्थलकं पश्यति।

उरःस्थलस्य दार्ढ्ये यः प्रकर्षातिशयः स कालिदासेन रघुवंशस्य तृतीये सर्गे रघोर्वक्षःस्थले महेन्द्रस्य महत्तमं प्रहरणं वज्रं विफलीकृत्यैव-मभिव्यञ्जितः—

स चापमुत्सृज्य विवृद्धमत्सरः प्रणाशनाय प्रबलस्य विद्विषः।
महीध्रपक्षव्यपरोपणोचितं स्फुरत्प्रभामण्डलमस्त्रमाददे॥

रघु. ३ ६०

रघुर्भृशं वक्षसि तेन ताडितः पपात भूमौ सह सैनिकाश्रुभिः।
निमेषमात्रादवधूय तद्व्यथां सहोत्थितः सैनिकहर्षनिस्स्वनैः॥

रघु. ३. ६१

भुजयोः सारं दीर्घतां च कालिदासः पूर्वोक्तेन 'युवा युगव्यायतबाहुः' इत्येवं 'हरिरिव युगदीर्घैर्दोर्भिरंशैस्तदीयैः पतिरवनिपतीनां तैश्चकाशे

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चतुर्भिः ।' [रघु. १०. ८६] इत्येवं च युगौपम्येनेव भुजङ्गेन्द्रौपम्येन, नगरपरिघौपम्येन च प्रकाशयति । दिलीपस्य दोर्दण्डौ प्रशंसताऽनेनोच्यते—

पुरन्दरश्रीः पुरमुत्पताकं प्रविश्य पौरैरभिनन्द्यमानः ।
भुजे भुजङ्गेन्द्रसमानसारे भूयः स भूमेर्धुरमाससञ्ज ॥

रघु. २. ७४

एवमेव दुष्यन्तमहिमानं प्रकटयता कविनानेन—

नैतच्चित्रं यदयमुदधिश्यामसीमां धरित्री-
मेकः कृत्स्नां नरगपरिघ'प्रांशुबाहुर्भुनक्ति ।
आशंसन्ते सुरयुवतयो बद्धवैरा हि दैत्यै-
रस्याधिज्ये धनुषि विजयं पौरुहूते च वज्रे ॥ २. १५

इत्येवं शाकुन्तले,

पौत्रः कुशस्यापि कुशेशयाक्षः ससागरां सागरधीरचेताः ।
एकातपत्रां भुवमेकवीरः पुरार्गलादीर्घभुजो बुभोज ॥

रघु० १८. ४

इत्येवं च रघुवंशे निषधमहिमानं प्रकाशयता नगरार्गलदीर्घताऽपि भुजयोरौपम्यपदे न्यवेशि । परिघोऽर्गलश्चेत्यनर्थान्तरमिति 'भार्गवस्य सुकृतोऽपि सोऽभवत् स्वर्गमार्गपरिघो दुरत्ययः ।' [रघु० १. ८८] इति, 'भुजेन रक्षापरिघेण भूमेः' [रघु० १६. ८४] इति च कालिदासप्रयोगेण, 'परिघो योगभेदेऽस्त्रविशेषेऽर्गलघातयोरि'-ति मेदिनीवाक्येन च स्फुटम् ।

स्कन्धयोः सौभगं वृषभस्कन्धसौभगेनोपमीयते । यथैतत् तद्— 'व्यूढोरस्को वृषस्कन्धः' इति प्रागुक्तेनैव दिलीपवर्णनपद्येन स्फुटम् । तदर्थमंसलशब्दोऽपि प्रयुज्यतेतरां क्रियासमभिहारेण सुकविना । तथाहि स्वकीयां स्वसारमादाय कुशमुपतिष्ठमानो नागराजः कुमुदः कुशस्य दक्षिणं बाहुं प्रशंसन्नुदीरयति—

तदेतदाजानुविलम्बिना ते ज्याघातरेखाकिणलाञ्छनेन ।
भुजेन रक्षापरिघेण भूमेरुपैतु योगं पुनरंसलेन ॥

रघु० १६. ८४

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सोऽयमंसलत्वपरिघौपम्ययोरेकत्र सन्निपातः। अंसलपदं पुनर्दिलीपसूनु-वर्णनपद्येऽपि प्रयुक्तपूर्वमेव—'युवा युगव्यायतबाहुरंसलः' इति। सेयं पुरुषशरीरस्य स्थूलधातुशुद्धिः। अथ सूक्ष्मधातुशुद्धिः।

सूक्ष्मधातुशुद्धिः

शुद्धिरियं 'सार'-नाम्ना विशेषेण निरूप्यते। यच्चेदं सारं स्त्रीपुंसयोः सममेव निरूप्यते कालिदासेन। पार्वतीशरीरे सर्वस्वरूपं सारमिदं—

स्त्रीसारम्

क्लमं ययौ कन्दुकलीलयापि या तया मुनीनां चरितं व्यगाह्यत।
ध्रुवं वपुः काञ्चनपद्मनिर्मितं मृदु प्रकृत्या च ससारमेव च॥

[कु० ५. १६] इतितपःसमाधिवर्णनप्रस्तावनापद्येन वाच्यवृत्त्यैवोपस्थाप्यते

'शुचौ चतुर्णां ज्वलतां हविर्भुजां मध्ये स्थित्वाऽनन्यदृष्ट्या सवितु-रीक्षणम्[1], अयाचितोपस्थिताम्बुचन्द्ररश्मिरसाभ्यां पारणाविधिः,[2] वर्षासु शिलायामेवानिकेतो वासः,[3] सहस्यरात्रीणाम् उदवासेन नयनम्[4], स्वयं विशीर्णैर्द्रुमपर्णैरेव प्राणवृत्तिः,[5] तस्याश्चापि परित्यागः[6] एवंविधैर्व्रतैः मृणालिकापेशलानामपि शरीरधातूनां ग्लपनस्योपक्षेपेण पुनरिदमेव सारं प्रतीयमानवृत्त्यापि निपुणमुपश्लोक्यते। अथापि संतोषमनुद्वहता कविना संस्तुतचरमुपमाशिल्पं विहाय [कु० ५. २६]—

मृणालिकापेलवमेवमादिभिर्व्रतैः
स्वमङ्गं ग्लपयन्त्यहर्निशम्।
तपः शरीरैः कठिनैरुपार्जितं
तपस्विनां दूरमधश्चकार सा॥

इत्येवं शरीरविशेषणाभ्यां पेलवत्व-कठिनत्वाभ्यां वर्णनीय-पार्वतीतपस्वि-गताभ्यामेकत्वबहुत्वाभ्यां च व्यतिरेकशिल्पपरिस्पन्देनाप्युपक्रम्यते।

---

१. कु० ५. २०　२. कु० ५. २२　३. कु० ५. २५
४. कु० ५. २६　५-६. कु० ५. २८　७. कु० ५. २९

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पार्वतीगतं सारमिदं तारकासुरवधोपायमादिशता वेदमूर्त्तिना भगवता पितामहेनापि—

उभे एव क्षमे वोढुमुभयोर्बीजमाहितम् ।
सा वा शम्भोस्तदीया वा मूर्त्तिर्जलमयी मम ॥

कु० २. ६०

इत्येवं प्रमाणीक्रियते । इदमेव च तत् सारं येनाहितदुष्यन्तप्रजानिषेका शकुन्तला कुलपतिना कण्वेनाभिनन्द्यते [शा० ४. १६]—

अभिजनवतो भर्तुः श्लाध्ये स्थिता गृहिणीपदे
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला ।
तनयमचिरात् प्राचीवार्कं प्रसूय च पावनं
मम विरहजां वत्से न त्वं शुचं गणयिष्यसीति ॥

एतदर्थमेव च प्रभातरलानि ज्योतींषि नाकपृष्ठाद् वसुन्धरापृष्ठेऽवतार्यन्ते, एतदर्थमेव च तानि, तदपत्यानि च 'मान्य[1]-प्रतिपत्तिपूर्वकं दारेषु-दृश्यन्ते'। एतेन सारेणैव भार्या जाया[2] भवति, सुतरूपां दक्षिणां दत्त्वा सुदक्षिणा[3] च सिद्ध्यति गृहमेधनाम्नि प्राजापत्ये सवने। अत एव च सत्स्वपि महत्स्वप्यवरोधेषु[4] सुदक्षिणाभिरेव कलत्रवन्तो भारतीयाः ।

---

१. क. 'न प्रभातरलं ज्योतिरुदेति वसुधातलात्' शा० १. २४

ख. 'सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया' शा० ४. १७। अत्र 'सा मान्ये' तिच्छेदः।

२. अथ प्रजानामधिपः प्रभाते जायाप्रतिग्राहितगन्धमाल्याम् रघु० २. १ इति जायाशब्दः साभिप्रायः 'तज्जाया जाया भवति यदस्यां जायते पुनः' इति जायात्वं नाम पुत्रोत्पत्तियोग्यतैव ।

३. सुदक्षिणा क. 'तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा ।
पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा ॥ र० १. ३१

ख. दिलीपपत्नी 'सा प्रतीकभूता सर्वासामपि भारतीयानां पत्नीनाम् ।

४. कलत्रवन्तमात्मानमवरोधे महत्यपि ।
तया मेने मनस्विन्या लक्ष्म्या च वसुधाधिपः ॥ रघु० १. ३२

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अङ्गवर्णनप्रयोजनम्

एतस्यैव च सारस्य संप्रसिद्धये स्तनजघनयोस्तादृशि सातिशयानि चित्रणानि सुकवीनाम्, न पुनः कामयानसमवस्थतामारुरुक्षया सुमतीनाम्। राष्ट्रहितैकबद्धचक्षुष्काः कविब्रह्माणो नारीं वेदीकृत्य महौजसो वीराँश्च यजमानीकृत्य निषेकहविर्भिरपूर्वं किञ्चिदर्जयितुं स्पृहयन्ते, न तु, स्थूलदृशः सन्तः नारीशरीरपुष्पेषु भ्रमरायित्वा मानुष्यकात् तिर्यक्साधारण्यमर्जयितुम्। श्रूयते हि यवनानीया २॥ सहस्रवर्षप्रत्नेऽपि वाङ्मये शृङ्गाररसं वाग्व्याहारेणैव विग्लापयन्ति, न दिदृक्षन्ते तत्र सर्वदमनायूरघुसदृशान् सुमेधसः, वैन्यप्रभृतीन् दुर्मेधसोऽपि वा तनयान्। नेयमास्माकीना स्थितिः। पुरुषार्थवादिनो वयम्। अस्माभिर्निष्फलं न प्रवर्त्यते। अत एव महाकवेः कालिदासस्य घोषः 'प्रजायै गृहमेधिनाम्'-इति। उच्चुष्कस्तनीं सक्थिमात्रनितम्बजघनां च को वा स्पृहयेत् ऋते सारमेयम् अस्थिमात्रैकरसम्। पतितापि वा कस्यचिद् गले किमिव धारयेद् गर्भम्। ऋते च गर्भं किं नु तया व्यञ्जनैकवनितया चर्मभस्त्रिकया। धृतेऽपि गर्भे हीनधातु पिण्डमात्रं सा जनयेत्, अकिञ्चनसारं जन्तुमात्रं बिडालमर्कटप्रतिकल्पम्। जनितस्यापि तस्य वैश्वानरं केनेयं प्रीणयेत् पयोधरप्रवृद्ध्यभावे। तदेवं व्यवहारदर्शिनो हि नारीशरीरे स्तनप्रवृद्धिं जघनदृढतां चोपनिबध्नन्तो महाकवयः। स्वस्थशरीरधातुरेव माता स्वस्थशरीरधातुं तनयं प्रसोतुं क्षमेत, नान्यादृशी। अत एव

दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः।
अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव॥
४.४।

इति शाकुन्तले दैवी वाक्। अत एव च

संरोपितेऽप्यात्मनि धर्मपत्नी
त्यक्ता मया नाम कुलप्रतिष्ठा।
कल्पिष्यमाणा महते फलाय
वसुन्धरा काल इवोप्तबीजा॥ शा० ६. २४

१. रघु० १. ७ २. पश्यन्तु सीताचरिते ६. ४६

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति,

तं भावार्थं प्रसवसमयाकाङ्क्षिणीनां प्रजाना-
मन्तर्गूढं क्षितिरिव नभोबीजमुष्टिं दधाना ॥

[रघु० १६. ५७] इति,

निदानमिक्ष्वाकुकुलस्य सन्ततेः सुदक्षिणा दौहृदलक्षणं दधौ ।
[रघु० ३. १] इति च गर्भमाहात्म्यं शिरसिकृत्य;

अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः
सुरसरिदिव तेजो वह्निनिष्ठ्यूतमैशम् ।
नरपतिकुलभूत्यै गर्भमाधत्त राज्ञी
गुरुभिरभिनिविष्टं लोकपालानुभावैः ॥

रघु० २. ७५

इति,

निधानगर्भामिव सागराम्बरां
शमीमिवाभ्यन्तरलीनपावकाम् ।
नदीमिवान्तःसलिलां सरस्वतीं
नृपः ससत्त्वां महिषीममन्यत ॥

रघु० ३. ६

इति सगर्भा माता कालिदासेन सादृश्योत्तममालिकाभिरभ्यर्च्यते, अभ्यर्च्यते च

ताभिर्गर्भः प्रजाभूत्यै दध्रे देवांशसम्भवः ।
सौरीभिरिव नाडीभिरमृताख्याभिरम्मयः ॥

रघु० १०. ५८

सममापन्नसत्त्वास्ता रेजुरापाण्डुरत्विषः ।
अन्तर्गतफलारम्भाः सस्यानामिव सम्पदः ॥

रघु० १०. ५९

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विभक्तात्मा विभुस्तासामेकः कुक्षिष्वनेकधा ।
उवास प्रतिमाचन्द्रः प्रसन्नानामपामिव ॥

रघु० १०. ६५

कुमारभृत्याकुशलैरनुष्ठिते भिषग्भिराप्तैरथ गर्भभर्मणि ।
पतिः प्रतीतः प्रसवोन्मुखीं प्रियां ददर्श काले दिवमभ्रितामिव ॥

[रघु० ३. १२] इत्येवं ताभिस्ताभिः कविकर्मपराकाष्ठाधिरूढकौशलपरिस्पन्दाभिरुक्तिमुक्ताभिः स स महार्हो गर्भः;

अथाग्र्यमहिषी राज्ञः प्रसूतिसमये सती ।
पुत्रं तमोपहं लेभे नक्तं ज्योतिरिवौषधिः ॥

रघु० १०. ६६

कैकेय्यास्तनयो जज्ञे भरतो नाम शीलवान् ।
जनयित्रीमलञ्चक्रे यः प्रश्रय इव श्रियम् ॥

रघु० १०. ६७

सुतौ लक्ष्मणशत्रुघ्नौ सुमित्रा सुषुवे यमौ ।
सम्यगाराधिता विद्या प्रबोधविनयाविव ॥

रघु० १०. ७१

इत्येवं च स स प्रसवः । एवमेव

शय्यागतेन रामेण माता शातोदरी बभौ ।
सैकताम्भोजबलिना जाह्नवीव शरत्कृशा ॥

रघु० १०. ६९

रघुवंशप्रदीपेन तेनाप्रतिमतेजसा ।
रक्षागृहगता दीपाः प्रत्यादिष्टा इवाभवन् ॥

रघु० १०. ६८

अरिष्टशय्यां परितो विसारिणा सुजन्मनस्तस्य निजेन तेजसा ।
निशीथदीपाः सहसा हतत्विषो बभूवुरालेख्यसमर्पिता इव ॥

[रघु० ३. १५] इति जातकस्यापि शोभनेन वपुषा निरतिशयेन तेजसा

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

च प्रहृष्यति कालिदासस्यापूर्वदर्शिनी प्रज्ञा, आयोजयति च लोका त-गांस्तांस्तान् महार्हानुत्सवान् [रघु० ३. १४]—

दिशः प्रसेदुर्मरुतो ववुः सुखाः प्रदक्षिणार्चिर्हविरग्निराददे ।
बभूव सर्वं शुभशंसि तत्क्षणं भवो हि लोकाभ्युदयाय तादृशाम् ॥

सुखश्रवा मङ्गलतूर्यनिस्स्वनाः
प्रमोदनृत्यैः सह वारयोषिताम् ।
न केवलं सद्मनि मागधीपतेः
पथि व्यजृम्भन्त दिवौकसामपि ॥

रघु० ३. १६

तस्योदये चतुर्मूर्त्तेः पौलस्त्यचकितेश्वराः ।
विरजस्कैर्नभस्वद्भिर्दिश उच्छ्वसिता इव ॥

रघु० १०. ७३

कृशानुरपधूमत्वात् प्रसन्नत्वात् प्रभाकरः ।
रक्षोविप्रकृतावास्तामपविद्धशुचाविव ॥

रघु० १०. ७४

पुत्रजन्मप्रवेश्यानां तूर्याणां तस्य पुत्रिणः ।
आरम्भं प्रथमं चक्रुर्देवदुन्दुभयो दिवि ॥

रघु० १०. ७६

सन्तानकमयी वृष्टिर्भवने चास्य पेतुषी ।
सन्मङ्गलोपचाराणां सैवादिरचनाऽभवत् ॥

रघु० १०. ७७

एवम् ।

एवमेव कविरसौ सारवतीनां मातॄणां कुक्षिषु परिपाकमाप्ताना-मेषां प्रसवानां पूजायै,[1] वायुविभावसु-चन्द्र-[3] समुद्र-श्यामाभ्रदिवस-चतुर्वर्ग-

१–२. रघु० १०. ८२, ३. ३७ ३–४. रघु० १०. ८२, ३. १७
५. रघु० १०. ८३, ३. १२ ६. रघु० १०. ८४

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुरगजदन्त[1]-नययोग[2]-युग[3]दीर्घबाहुआकरोद्भवमणि[4]-गुह[5] -जयन्त[6]- [7]मरीच्यादिवंशकृदृषि-प्रभृतिस्वरूपाण्यपि नीराजनवर्धमानकानि[8] भ्रमयति ।

एतद्धि तद् रहस्यं यद् भारतीयाः संस्कृतकवयः पुरन्ध्रीणामङ्गानि प्रशंसन्ति तासामङ्गनात्वं च प्रसाधयन्ति । शरीरवैभवमपि राष्ट्रियं वैभवम् । तद्वर्णने कृपणताऽसह्यशल्यं वाग्जन्मवैफल्यमेव । सा चेयं वर्णयितृ रसिकस्य वा दुर्बलता यदसौ नारीप्रतीकानां वर्णनमात्रेऽपि विकृतिं पश्यति । अतएव—यदुच्यते पार्वति पापवृत्तये

न रूपमित्यव्यभिचारि तद् वचः ॥ कु० ५. ३६ इति,

'नवामिन्दुकलां लोकः केन भावेन पश्यती'ति च कवेः प्रणयः ।

इत्थमियं सर्वापि गाथा सारवतीनामेव सौभाग्यजुषामङ्गनोत्तमानाम् ।

पुरुषसारम्

दिलीपस्य सारं सर्वातिरिक्तम् , ततश्च तस्यात्मापि मेरुरिव सर्वोन्नतः सर्वतेजोऽभिभावी च । यदुच्यते

सर्वातिरिक्तसारेण सर्वतेजोऽभिभाविना ।
स्थितः सर्वोन्नतेनोर्वीं क्रान्त्वा मेरुरिवात्मना ॥

र० १. १४

यदिदं सारस्य सर्वतेजोऽभिभावित्वं तदेव दुष्यन्तस्य महेन्द्राशक्ये कर्मणि विनियोगक्षमत्वम् । यदुच्यते [शा० ६. ३०]—

१–३. रघु० १०. ८६ ४. रघु० ३. १८

५. रघु० ३. २३ आदि, वि० ५. १४ ६. रघु० ३. २३,

७. रघु० ३. २७ एवमेवोपमानान्तराणि पूर्वोद्धृतेषु पद्येषु मृग्यानि ।

८. वर्धमानकल्पनायै श्रीहर्षस्य—

'धृतलाञ्छनगोमयाञ्चनं विधुमालेपनपाण्डरं विधिः ।
भ्रमयत्युचितं विदर्भजाननीराजथवर्धमानकम् ॥ नै० २. २६

इति पद्यं प्रमाणीक्रियेत ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सख्युस्ते स किल शतक्रतोरजय्यस्तस्य त्वं रणशिरसि स्मृतो निहन्ता ।
उच्छेत्तुं प्रभवति यन्न सप्तसप्तिस्तन्नैशं तिमिरमपाकरोति चन्द्रः ॥

अतएव च दुष्यन्तस्यात्मजो भरतः सर्वदमनः, डिम्भभावेऽपि लङ्घनमगणयित्वा सिंहदन्तानां गणयिता । यथोच्यते [शा० ७. १५]—

जृम्भस्व रे सिंह, दन्तांस्ते गणयिष्ये ॥

दुःखस्यायं विषयो यत् कालिदाससपर्यायै भारतीयो डाकतारविभागः सिंहदन्तगणनामिमामविगणय्य प्रणयकृपणं मेघदूतयक्षम्, तथाविधामेव च मेनकातनयां वव्रे । वस्तुतः

कालिदासो वीररसस्यैव कविः, अयं तु विशेषो यदसौ वीरभावाय युद्धस्थलम् अनादायान्तःपुरमादत्ते वीरप्रसवतीर्थम् । तस्यास्य वीरपूजौपयिकत्वेनैव शृङ्गारं वृण्वतः शृङ्गारैककर्बुरितान्तःकरणत्वविमाननना सरस्वत्या एवावमानना, भारतीयताया एव गर्हणा, पुरुषार्थवादस्यैव धिक्कारः, मन्त्रमपूजयित्वा तद्यन्त्रस्यैव सपर्या, केदारकुक्षिमनादृत्य च सस्यसम्पत्तिमात्रार्थमत्यादरः । स चायमविवेक एवैकः । यत्र हि महतः संयमस्य परमा प्रतिष्ठा, यत्र वशित्वं परात्पर आदर्शः, यत्र च सन्देहपदेषु वस्तुषु सतामन्तःकरणप्रवृत्तिरपि प्रमाणं तस्य कीदृशी विलासैकबन्धुता शुभस्य माङ्गलिकस्य शिवैकप्रतिष्ठस्याभिजाततावन्धुरस्य वाङ्मयस्य ।

सर्वदमनस्य सिंहदन्तगणनाचित्रमिवैव विद्यते रघोः देवेन्द्रवज्रं विफलीकृत्य युद्धसहत्वं रघुवंशे । डाकतारविभागस्तदपि चित्रयित्वा साहित्यरसलिप्सूनां सुमेधसामक्षिष्वञ्जनयेत कच्चित् ।

अस्ति चैवंविधमेव तृतीयं चित्रं शाकुन्तल एव यत्र सत्कल्पवृक्षे वने प्राणानां वृत्तिरनिलेनाभ्यस्यते, यत्र काञ्चनपद्मरेणुकपिशतोये तीर्थे पुण्याभिषेकक्रिया, रत्नशिलागृहेषु ध्यानम्, विबुधस्त्रीसन्निधौ च संयमस्तादृक्षस्य मारीचाश्रमस्य ।

अस्ति च चतुर्थं चित्रं नन्दिनीं रक्षितुं कुम्भोदरनाम्ने सिंहाय स्वदेहमुपनयतो नूतनवयसः, कान्तदेहस्य, जगदेकाधिपतेश्च महात्मनो दिलीपस्य ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अस्ति च पञ्चमं चित्रं निर्मक्षिके निशीथे देहैकद्वितीयस्य कुशस्य शयनतल्पमुपेयुष्यै योषिते परस्त्रीप्रवृत्तिपराङ्मुखत्वसमाश्वासनमन्त्रोद्गाररत्नस्य ।

सेयं सारवतामेव सुमानुषाणां चरित्रचित्रमाला । इदमेव सारं रघोर्दोर्दण्डयोर्जागर्त्ति याभ्यामसौ हिमालयस्य सारं हिमालय इव स्वस्य परिचिनोति—

परस्परेण विज्ञातस्तेषूपायनपाणिषु ।
राज्ञा हिमवतः सारो राज्ञः सारो हिमाद्रिणा ॥

रघु० ४. ७९

रघोर्वक्षसि स्थिरम् एतदेव सारं महेन्द्रस्यान्तिममस्त्रं वज्रं विफलयति । अत एव सारवत्तायामद्रितोऽपि गरीयस्त्वमस्य प्रमाणयन् स एव देवराजो ब्रूते [रघु० ३. ६३]—

असह्यमद्रिष्वपि सारवत्तया
न मे त्वदन्येन विसोढमायुधम् ।
अवेहि मां प्रीतमृते तुरङ्गमात्
किमिच्छसीति स्फुटमाह वासवः ॥

अयमेव सारातिशयो वीर्यातिशयपदेनापि सुकविनानेनाभिलप्यते—

तथापि शस्त्रव्यवहारनिष्ठुरे
विपक्षभावे चिरमस्य तस्थुषः ।
तुतोष वीर्यातिशयेन वृत्रहा
पदं हि सर्वत्र गुणैर्निधीयते ॥ इति ।

रघु० ३. ६२

अस्यैव सारस्य गाथा सापि यत्र दुष्यन्तशराः भगवतो नृसिंहस्य नतपर्वभिर्नखैः, महेन्द्रस्य च प्राणभूतेन वज्रेणोपमीयन्ते [शा. ७. ३]—

सुखपरस्य हरेरुभयैः कृतं
त्रिदिवमुद्धृतदानवकण्टकम् ।
तव शरैरधुना नतपर्वभिः
पुरुषकेसरिणश्च पुरा नखैः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नैतच्चित्रं यदयमुदधिश्यामसीमां धरित्री-
मेकः कृत्स्नां नगरपरिघप्रांशुबाहुर्भुनक्ति।
आशंसन्ते सुरयुवतयो बद्धवैरा हि दैत्यै-
रस्याधिज्ये धनुषि विजयं पौरुहूते च वज्रे॥

शा. २. १५

पुत्रस्य ते रणशिरस्ययमग्रयायी
दुष्यन्त इत्यभिहितो भुवनस्य भर्ता।
चापेन यस्य विनिवर्त्तितकर्म वृत्तं
तत् कोटिमत् कुलिशमाभरणं मघोनः॥

शा. ७. २६ इति॥

अस्यैव सारस्य परिणामस्तेजोऽतिशयः। स च स्वस्थस्य पुरुषशरीरस्य स्वाभाविको विशेषः। अत एव दिलीपो न्यस्तराजलक्ष्मीलक्षणोऽपि राजलक्ष्मीं दधानो न न लक्ष्यते [रघु० २. ७]—

स न्यस्तचिह्नामपि राजलक्ष्मीं
तेजोविशेषानुमितां दधानः।
आसीदनाविष्कृतदानराजि-
रन्तर्मदावस्थ इव द्विपेन्द्रः॥

अयमेव चानुभावः। यदुच्यते—

माभूदाश्रमपीडेति परिमेयपुरस्सरौ।
अनुभावविशेषात्तु सेनापरिवृताविव॥

रघु० १. ३७

इमौ तेजोऽनुभावावेव लावण्यनाम्ना स्त्रीगात्रयष्ट्यां [कु. १. २५]

दिने दिने सा परिवर्धमाना
लब्धोदया चान्द्रमसीव लेखा।
पुपोष लावण्यमयान् विशेषान्
ज्योत्स्नान्तराणीव कलान्तराणी॥ इति

पितुः प्रयत्नात् स समग्रसम्पदः शुभैः शरीरावयवैर्दिने दिने।
पुपोष वृद्धिं हरिदश्वदीधितेरनुप्रवेशादिव बालचन्द्रमाः॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

[र. ३. १२] इति च स एव विशेषः पुरुषशरीरे। सेयं स्थूलसूक्ष्माणां शरीरधातूनां शुद्धिः। अथ मतिशुद्धिः।

२. मतिशुद्धिः

कालिदासस्य पुरुषाः स्त्रियश्च मतावपि शुद्धिं दधति। भगवतः सूर्यस्य अश्वा इव मतेर्गुणा अपि सप्त भवन्ति। ते च

शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा।
ऊहापोहोऽर्थविज्ञानं तत्त्वज्ञानं च धीगुणाः॥

इति विष्णुगुप्त-शिष्यकामन्दकोक्तेः (१) श्रवणेच्छा (२) श्रवणम्, (३) चेतोऽवधानेनाक्षरशः सम्यगादानम्, (४) अभ्यासः, (५) ऊन-परिकल्पनपुरस्सरमधिकनिरसनम् (६) शाब्दबोधः (७) तात्पर्य-पर्यवसानञ्चेति सोपानक्रमेण श्रवणमनननिदिध्यासनाख्यप्रयत्नत्रयी-पल्लवनम्। कालिदासस्य रघौ सर्वेऽप्येते गुणाः सप्तसप्तेः स्यन्दने सप्तय इव सङ्गताः, सङ्गताश्च स्वास्थ्येन, अर्जितौजोज्योतिष्ट्वेन च। अतश्चासौ चतस्रोऽपि विद्याः सुखेनैव तरति पवनातिगैरश्वैः सूर्यो दिश इव। यदुच्यते [रघु० ३. ३०]—

धियः समग्रैः स गुणैरुदारधीः क्रमाच्चतस्रश्चतुरर्णवोपमाः।
ततार विद्याः पवनातिपातिभिर्दिशो हरिद्भिर्हरितामिवेश्वरः॥

---

१. (क) मालविकाग्निमित्रे यतिवेषया कौशिक्या सहिता धारिणी अध्यात्मविद्यया सहिता विग्रहवती त्रयीव निरूप्यते—

मङ्गलालङ्कृता भाति कौशिक्या यतिवेषया।
त्रयी विग्रहवत्येव सममध्यात्मविद्यया॥ मा० १. १४

(ख) वरतन्तुः कौत्सं चतुर्दशकोटवित्तं याचते—विद्यापरिसंख्ययैव—

'निर्बन्धसञ्जातरुषार्थकार्श्यमचिन्तयित्वा गुरुणाहमुक्तः।
वित्तस्य विद्यापरिसंख्यया मे कोटीश्चतस्रो दश चाहरेति॥ रघु. ५. २१

एतेन विद्यागणनाया द्वैविध्यमाविर्भवति। तत्र विद्याचतुष्टयवादे चतुर्थी आन्वीक्षिकीति कौटल्यः। अत्र उपनिषदां चतुर्थत्वमिति विचित्र उपन्यासः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एभिरेव गुणैः सुदर्शनोऽपि गुरूणामक्लेशकरः संस्तिस्रोऽपि विद्याः स्मरन्निवाधिगच्छति [र. १८. ५०]—

स पूर्वजन्मान्तरदृष्टपाराः स्मरन्निवाक्लेशकरो गुरूणाम् ।
तिस्रस्त्रिवर्गाधिगमस्य मूलं जग्राह विद्याः प्रकृतीश्च पित्र्याः ॥

भगवतीं पार्वतीं च शरदि गङ्गां हंसमाला इव, रात्रौ महौषधिं स्वभास इव च सर्वा अपि प्राक्तनजन्मविद्याः प्रतिपद्यन्ते । तत्र च कारणं स्थिरोपदेशोपलक्षिता मतिशुद्धिरेव । यदुच्यते—

तां हंसमालाः शरदीव गङ्गां महौषधिं नक्तमिवात्मभासः ।
स्थिरोपदेशामुपदेशकाले प्रपेदिरे प्राक्तनजन्मविद्याः ॥

[कु० १. ५०] इति ।

मालविकाऽपि नितान्तमेव मेधाविनी । सापि पात्रविशेषः । तत्र न्यस्ता गुरुविद्या गुणान्तरमपि लभते समुद्रशुक्तौ न्यस्तं पयोदजलमिव, अतश्च शिष्यगुणेन गुरुरपि उपकृतो भवति [मा० १. ४-६]—

बकुलावलिका : आर्य, देवी पृच्छति उपदेशग्रहणे नातिक्लिश्नाति वः शिष्या मालविकेति ।

गणदासः भद्रे विज्ञाप्यतां देवी परमनिपुणा मेधाविनी चेति । किं बहुना—

यद् यत् प्रयोगविषये भाविकमुपदिश्यते मया तस्यै ।
तत् तद् विशेषकरणात् प्रत्युपदिशतीव मे बाला ॥

बकुला० कृतार्थेदानीं वः शिष्या, यस्या गुरुजन एवं तुष्यति ।

गणदासः भद्रे, तद्विधानामसुलभत्वात् पृच्छामि, कुतो देव्या तत्पात्रमानीतमिति । ०० आकृतिविशेषप्रत्ययादेना-मनूनवस्तुकां संभावयामि । भद्रे मयापि यशस्विना भवितव्यम् । यतः

'पात्रविशेषे न्यस्तं गुणान्तरं व्रजति शिल्पमाधातुः ।
जलमिव समुद्रशुक्तौ मुक्ताफलतां पयोदस्य ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अतएव रघोरपि गुरवोऽवन्ध्ययत्ना एव विनयोपदेशे [रघु० ३. २९]—

अथोपनीतं विधिवद् विपश्चितो विनिन्युरेनं गुरवो गुरुप्रियम् ।
अवन्ध्ययत्नाश्च बभूवुरत्र ते क्रिया हि वस्तूपहिता प्रसीदति ॥

कालिदासस्य मेधावी मानवो विद्वानेव न भवति, तत्र प्रज्ञाकादम्बिनी-गर्भे विद्युदुद्योतसोदरा[1] प्रतिभापि जागर्ति। अस्ति च सा प्रतिभा कल्याणी[2], ततश्च नन्दिनी अर्थविनिश्चये विवेकिनी च। अतएव गूढ-विग्रहः शक्रो यदा दिलीपस्यान्तिमाश्वमेधाश्वं हरति, तद्दर्शनविषादाच्च कुमारसहितं सैन्यं लुप्तप्रतिपत्ति तिष्ठति तदा प्रतिभेयं स्वयमुपतिष्ठते, तदङ्गनिष्यन्दजलेन च प्रमृष्टलोचनो रघुरतीन्द्रियानपि भावानध्यक्षी-कर्तुमवाप्तलोकोत्तरशक्तिरुपजायते, पश्यति च तिरस्करिणीविद्याप्रति-च्छन्नविग्रहं देवेन्द्रम्, तद्रथरश्मिसंयतं पितृयज्ञाश्वं च—

ततः परं तेन मखाय यज्वना तुरङ्गमुत्सृष्टमनर्गलं पुनः ।
धनुर्भृतामग्रत एव रक्षिणां जहार शक्रः किल गूढविग्रहः ॥
विषादलुप्तप्रतिपत्ति विस्मितं कुमारसैन्यं सपदि स्थितं च तत् ।
वसिष्ठधेनुश्च यदृच्छयाऽऽगता श्रुतप्रभावा ददृशेऽथ नन्दिनी ॥
तदङ्गनिष्यन्दजलेन लोचने प्रमृज्य पुण्येन पुरस्कृतः सताम् ।
अतीन्द्रियेष्वप्युपपन्नदर्शनो बभूव भावेषु दिलीपनन्दनः ॥
स पूर्वतः पर्वतपक्षशातनं ददर्श देवं नरदेवसम्भवः ।
पुनः पुनः सूतनिषिद्धचापलं हरन्तमश्वं रथरश्मिसंयतम् ॥

रघु० ३. ३९–४२

अयमस्या नन्दिनी-प्रतिभाया विशेषो यदसौ अकीर्त्तितनामापि स्वयमुपतिष्ठते, कीर्त्तितनामापि च भृशमुपकुरुते। स्पष्टमेव यदियं योग-प्रतिभा। अतएव वसिष्ठधेनुः। वसिष्ठो हि दिलीपे सन्ततिस्तम्भकारणं

१. 'प्रतिभा कारणं तत्र (काव्ये) सा चार्थप्रतिभासनम् ।
प्रज्ञाकादम्बिनीगर्भे विद्युदुद्योतसोदरम् ॥
—अस्मत्कृता काव्यालङ्कारकारिका–२

२. अदूरवर्त्तिनीं सिद्धिं राजन् विगणयात्मनः ।
उपस्थितेयं कल्याणी नाम्नि कीर्तित एव यत् ॥ रघु० १. ८७

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

समाधिप्रतिभयैव पश्यति, कामधेनुशापमुक्तये च तादृशसमाधियोगसदृशं प्रतिबन्धकादृष्टप्रतिबन्धकरूपोत्तेजकादृष्टमेवोत्पिपपादयिषति । तदर्थं नन्दिनीधेनोः स्तन्यामृतपानं नन्दिनीविद्यारूपतन्त्रस्य साधनम्, नन्दिनीरूपादृष्टस्य च समुपार्जनमिति त्रितयमपि गोचारणव्रतद्वारा दिलीपायोपदिशति । ततश्च नन्दिनीप्रतिभायाः रघौ स्वयम्भूत्वमिव दिलीपे अदृष्टविशेषजन्यत्वमपि सुस्थिरम् । गुरुप्रसादौपयिकी चेयमिति प्रसादस्याप्यत्र कारणत्वं न न स्थिरम् । अयमत्र विशेषो यत् प्रसादोऽप्ययमदृष्टरूप एव, कृपापात्रजनाधिगतलाभेन सह [३]सामानाधिकरण्यस्यान्यथाऽशक्यसंभवात् । सेयं नन्दिनीप्रतिभा प्रत्येकं मानवं रघुमिवैवानुवंशिकेन क्रमेण वृणीतेति कालिदासस्य हृदयम् ।

सेयमेका मतिशुद्धिर्यत्र प्रतिभासमेधिता व्युत्पत्तिः । यत्र च व्युत्पत्तिसमेधिता प्रतिभा साऽप्यरा मतिशुद्धिः । रघुवंशनायकं रघुं सापि सेवते । अतएवोच्यते—

कामं कर्णान्तविश्रान्ते विशाले तस्य लोचने ।
चक्षुष्मत्ता तु शास्त्रेण सूक्ष्मकार्यार्थदर्शिना ॥

रघु० ४. १३

सूक्ष्मेषु कार्येषु कर्त्तव्यार्थं यद् दर्शयति तच्छास्त्रमेव चक्षुः, तेनैव च रघुश्चक्षुष्मानिति स्पष्टमेव यदत्र शास्त्रमेव प्रतिभामुत्पादयति 'दर्शनज्योतिःस्वरूपाम्' । अत एव रघुः स्वर्गापेक्षया मोक्षमधिकं मन्यते । त्यजति च यज्ञाश्वम्, निवारयति च पितरं दुर्बलात् एषणात्रितयकलुषितात् स्वर्गराज्यात्, चारयति च मुनिवनतरुच्छायासु मुनिवृत्तिम् । अत एव च सन्ति तत्र रघुवंशिनां शैशवे विद्याभ्यासादारभ्य योगेनान्ते तनुत्यागं यावत्

१–२. यदवोचाम काव्यालङ्कारकारिकायाम्—

स्वयम्भूश्च सहेतुश्चेत्यसौ लोके द्विधा स्थिता ।
आदिमादिकवौ दृष्टा द्वितीयान्यत्र दृश्यते ॥ का० ३
द्वितीया या भवन्त्यत्र करणानि बहून्यपि ।
कारणं तु भवत्यत्र सत्त्वोद्रेको हि केवलः ॥ का० ४

प्रसादोऽप्यदृष्टरूप एवेति तत्रास्माकं टिप्पणी ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

काव्यारम्भपरिसंख्याताः सर्वेऽपि विशेषाः। अत एव च भगवती पार्वती भगवन्तं शिवं यथार्थतो वेत्ति, वक्ति च [५. ७७-७८]—

अकिञ्चनः सन् प्रभवः स सम्पदां त्रिलोकनाथः पितृसद्मगोचरः।
स भीमरूपः शिव इत्युदीर्यते न सन्ति याथार्थ्यविदः पिनाकिनः॥

विभूषणोद्भासि पिनद्धभोगि वा गजाजिनालम्बि दुकूलधारि वा।
कपालि वा स्यादथवेन्दुशेखरं न विश्वमूर्त्तेरवधार्यते वपुः॥

यमामनन्त्यात्मभुवोऽपि कारणं कथं स लक्ष्यप्रभवो भविष्यति॥

ममात्र भावैकरसं मनः स्थिरं न कामवृत्तिर्वचनीयमीक्षते॥
[५. ८१-८२] इति।

पार्वती जानाति 'शिवः अकिञ्चनः, असम्पच्च यतो हि स वृषेण गच्छति।' वृषो धर्मः। स च भोगापवर्गोभयतटप्रवाही अध्यात्मसन्तानः। ततश्च भोगैकनिरतिविरहे कीदृशः सम्पदभियोगः। यत्र च सः ते महेन्द्रादयः। ते च शिवस्य नृत्याभिनयक्रियाच्च्युतं चिताभस्म मौलिषु विलिम्पन्ति। एकतश्चिताभस्म अपरतश्च त्रैलोक्यवैभवम्। वैभवं भस्मने कृतप्रणाममिति कीदृशी स्थितिः। नूनं शिवसन्निधानमेव तत्र मूलम्। ततश्च यत् शिवं तत् स्वयमेव सर्वातिगं वैभवम्। परिकरोपलक्षितं वैभवं पुनरनध्यात्मम्। यच्चानध्यात्मं तद् मृत्युः। मृत्युञ्जयश्च भगवान् शिवः। ततश्च स एवैक उदुत्तमः पतिः। स एव च सौभाग्यकल्पवृक्षस्योचित आलवालः। तामिमां विज्ञमर्यादां विदुषी पार्वती नियतमेव शरीरैरुपार्जितं तपस्विनां तपो दूरमधः करोति, तस्यास्तपसामध्यात्मप्रतिष्ठितत्वात्, कामनानां चानङ्गतामुपेयुषि काममात्रे विधृतत्वात्। अतएव चेयमचपला। उदारदर्शना सा शर्वं वाञ्छति, तत्र दृढं बद्धभावा, किन्तु तत्र धर्मेणैव पदं चिकीर्षति, न तु शकुन्तलावत् कामेन। सेयमुन्मीलितचक्षुष्कता। सा च नूनमेव मतिशुद्धिस्थिता।

३. स्वभावशुद्धिः

मतिशुद्धौ स्वभावशुद्धिरिति द्रढीयान् वादः। कालिदासस्य मानवस्तत्रापि प्रमाणम्। तस्य जीवने संयम एव स्थायी भावः। विषयैरनाकृष्टः स जरसा विनापि वृद्धो भवति। दिलीप एवंविध एव—

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः।
तस्य धर्मरतेरासीद् वृद्धत्वं जरसा विना ॥

रघु० १. २३

दिलीप एष प्रजाभ्यो बलिं गृह्णाति, किन्तु तासामेव भूत्यर्थम्। अत्र तस्यादर्शः स्वमूलपुरुषो भगवान् सूर्य एव। सूर्योऽपि सहस्रगुणमुत्स्रष्टुं रसानादत्ते—

प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ॥

रघु० १. १८

दिलीपो यौवने विषयानभिलष्यति, किन्तु अनासक्तियोगेन; अर्थानादत्ते, किन्तु अगृध्नुभावेन; दण्ड्यान् दण्डयति, किन्तु स्थित्यै, दारान् परिगृह्णाति, किन्तु प्रसूतये—

जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः।
अगृध्नुराददे सोऽर्थानसक्तः सुखमन्वभूत् ॥

१. २१

स्थित्यै दण्डयतो दण्ड्यान् परिणेतुः प्रसूतये।
अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः ॥

१. २५

दिलीपो ज्ञानी सन्नपि मौनमाचरति, शक्तो भवन्नपि क्षमाशीलता-व्रतमातिष्ठते, त्यागशीलोऽपि च श्लाघां न स्पृशति। इत्थमस्य गुणा गुणान्तरप्रसविनः—

ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।
गुणा गुणानुबन्धित्वात् तस्य सप्रसवा इव ॥

र० १. २२

संयमस्य सा परा प्रतिष्ठा यदाश्रमधर्मानतिक्रमः। सूर्यवंश्या अत्राप्युचिताः। ते हि शैशव एव अभ्यस्तसर्वविद्या भवन्ति यौवन एव विषयानभिलष्यन्ति, वार्धके मुनिवृत्तयो भवन्त्येव, अन्ते च शरीराणि

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्यजन्ति, किन्तु योगेन, न तु रोगेण, तत्रापि कर्म-भक्ति-ज्ञानसमेधितेन समाधियोगेन, न तु केवलेन समाधियोगेन, न वा केवलेन कर्मभक्तिज्ञानान्यतमयोगेन । तदिदमुक्तम्—

शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।
वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥

रघूणामन्वयं वक्ष्ये । र० १. ८

संयमाश्रिता एते गुणा रघुवंशस्यान्येष्वपि नायकेषु सुलभाः । कुशाख्यानं च तत्र प्रमाणम् । यथा चैतत् तदधोदत्तेन रघुवंशेन स्पष्टम्—

अथार्धरात्रे स्तिमितप्रदीपे शय्यागृहे सुप्तजने प्रबुद्धः ।
कुशः प्रवासस्थकलत्रवेषामदृष्टपूर्वां वनितामपश्यत् ॥

सा साधुसाधारणपार्थिवर्द्धेः स्थित्वा पुरस्तात् पुरुहूतभासः ।
जेतुः परेषां जयशब्दपूर्वं तस्याञ्जलिं बन्धुमतो बबन्ध ॥

अथानपोढार्गलमप्यगारं छायामिवादर्शतलं प्रविष्टाम् ।
सविस्मयो दाशरथेस्तनूजः प्रोवाच पूर्वार्धविसृष्टतल्पः ॥

लब्धान्तरा सावरणेऽपि गेहे योगप्रभावो न च लक्ष्यते ते ।
बिभर्षि चाकारमनिर्वृतानां मृणालिनी हैममिवोपरागम् ॥

का त्वं शुभे कस्य परिग्रहो वा किं वा मदभ्यागमकारणं ते ।
आचक्ष्व मत्वा वशिनां रघूणां मनः परस्त्रीविमुखप्रवृत्ति ॥

रघु. १६. ४–८

'रघूणां मनः परस्त्रीविमुखप्रवृत्ति' इति वाक्यम् उचितमेव बुद्धिप्रधानानां सूर्यवंश्यानाम् । तदेतत् कुशवाक्यं काव्यशास्त्राचार्याणां हृदयानि सहस्राब्दीभ्यामाहरति ।

इयमेव स्थितिर्मनःप्रधानानामपि चन्द्रवंश्यानाम् । दुष्यन्तश्चन्द्रवंशीय एव । स आश्रमकन्यकां वीक्ष्य सकामो जायते । तमिमं विकारमसौ प्रमाणमामनुते, तनुते च तादृशकामविषयीभूतायाः कन्यकायाः क्षत्रपरिग्रहक्षमतामसंशयम् । शकुन्तलां वीक्ष्य सकाम एष यद्—

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः।
सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः॥

शा. १

इदमुदाजह्रे तदिदमाजह्रेतमां शताब्दीनामपि सुमनसां मनांसि। विस्मृतपूर्वव्यतिकरोऽप्रत्यभिज्ञातशकुन्तलश्चायं शकुन्तलया 'आर्यपुत्र'-त्यभिधित्सिते तां वज्रेणेव जिघांसुर्भर्त्सयन्नूचे—

व्यपदेशमाविलयितुं किमीहसे जनमिमं च पातयितुम्।
कूलङ्कषेव सिन्धुः प्रसन्नमम्भस्तटतरुं च॥ इति

शा. ५. २१

ऊचे च—

कुमुदान्येव शशाङ्कः सविता बोधयति पङ्कजान्येव।
वशिनां हि परपरिग्रह-संश्लेषपराङ्मुखी वृत्तिः॥ इति।

शा. ५. २८

परस्त्रीस्पर्शः पांसुः। पांसुलता जिहीर्षितैव सर्वथा शुभाचाराणामार्याणाम्। दुष्यन्तस्तामिमां मर्यादां पालयति वक्ति च—

मूढः स्यामहमेषा वा वदेन्मिथ्येति संशये।
दारत्यागी भवाम्याहो परस्त्रीस्पर्शपांसुलः॥ इति

[शा. ५. २९]

तस्यास्य संयमस्य मानवीष्वपि महत्येव प्रतिष्ठा। सुदक्षिणा अपांसुलानां धुरि कीर्त्तनीया राज्ञी। सा हि तथा पतिपरायणा यथा दक्षिणा यज्ञपरायणा, यथा वा स्मृतिः श्रुत्यर्थपरायणा। भगवती सीता ब्रूते—

वाङ्मनःकर्मभिः पत्यौ व्यभिचारो यथा न मे।
तथा विश्वम्भरे मातर्मामन्तर्धातुमर्हसि॥

रघु० १५. ८१

लीयते च सद्योभवाद् रन्ध्राद् नागफणोत्क्षिप्तसिंहासननिषेदुष्याः समुद्ररशनाया भगवत्या वसुन्धराया अङ्कशय्यामधिशय्य पातालविवरे।

१–३. तस्याः खुरन्यासपवित्रपांसुमपांसुलानां धुरि कीर्त्तनीया।
मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत्॥ रघु० २. २

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इन्दुमती स्वयंवरवधूभावेन स्वयंवरसभां, प्रविशति न च सजते कुत्रचनापि राज्ञि ऋते कुमारमजम्। तत्र जन्मान्तरसंज्ञां प्रमाणयन्न-सावेव कविरिन्दुमत्याश्चेतोधातोरुत्तमं[1] सौकुमार्यमभिव्यानञ्ज, उपनिबबन्ध च तदर्थमेवमव्यभिचारकालुष्याननेकान् भावान्—

तस्मिन्नभिद्योतितबन्धुपद्मे प्रतापसंशोषितशत्रुपङ्के।
बबन्ध सा नोत्तमसौकुमार्या कुमुद्वती भानुमतीव भावम्॥

६. ३६

तस्याः प्रकामं प्रियदर्शनोऽपि न स क्षितीशो रुचये बभूव।
शरत्प्रमृष्टाम्बुधरोपरोधः शशीव पर्याप्तकलो नलिन्याः॥

६. ४४

नृपं तमावर्त्तमनोज्ञनाभिः सा व्यत्यगादन्यवधूर्भवित्री।
महीधरं मार्गवशादुपेतं स्रोतोवहा सागरगामिनीव॥

६. ५२

स्वसुर्विदर्भाधिपतेस्तदीयो लेभेऽन्तरं चेतसि नोपदेशः।
दिवाकरादर्शनबद्धकोशे नक्षत्रनाथांशुरिवारविन्दे॥

६. ६६

स्पष्टमेवात्र यत् कुमुद्वती-कमलिनी-स्रोतस्विनीनां नक्षत्रनाथ-भानुमत्-सागराणां च अयोगान्ययोगात्यन्तायोगव्यवच्छेदेन स्थितः प्रीतियोगः स्वरसप्रवृत्त इति। तथैव प्रकृतेऽपि स्वयंवरसभायामजेन्दुमत्योः। सेयमव्यभिचारिणी स्थितिः संयमस्य प्रकृतिविजयः।

४. जन्मशुद्धिः

शरीर-मति-स्वभावानां शुद्धिर्जन्मशुद्धिमनुवर्त्तते। सुक्षेत्रपतितस्यैव बीजस्य शोभनाङ्कुरसन्ततिः, सम्यगाप्यायितस्य च शोभनाङ्कुरस्य शोभना परिणतिरिति को नाम न स्वीकुर्वीत सचेताः। सोऽयं बीजाङ्कुरपरिणामन्यायो मानवमपि नातिक्रामति। तस्यापि गर्भाधानादारभ्य यौवनं यावत् परिपालनपरिपोषणे नितान्तमभ्यर्हिते। सैव चास्य जन्म-

१. रघु० १. ३१

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शुद्धिः। रघोर्वंशे चासावपि शुद्धिः सम्यगभ्यस्ता दृश्यते। अत एव तस्य प्रथमो विशेषः 'जन्मशुद्धि'-पदेनैवोच्यते—

सोऽहमाजन्मशुद्धानामाफलोदयकर्मणाम्।
आसमुद्रक्षितीशानामानाकरथवर्त्मनाम् ॥
रघूणामन्वयं वक्ष्ये— इति रघु० १. ५

जन्मशुद्धिरियं पूर्वपुरुषाणां शुद्धिमपेक्षते। अत एव दिलीपविषय उच्यते—

वैवस्वतो मनुर्नाम माननीयो मनीषिणाम्।
आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव ॥
तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः।
दिलीप इति राजेन्दुरिन्दुःक्षीरनिधाविव ॥
रघु० १. ११-१२

इन्दोः शुद्धिः क्षीरनिधिशुद्धेः परिणामः, दिलीपस्य शुद्धिश्च वैवस्वतान्वयशुद्धेरिति तुल्यौ वाक्यार्थौ, सुप्रकाशा च ततः कार्यशुद्धये कारणशुद्धिः।

दिलीपो मन्त्रमिमं जजाप। तज्जीवने च कालिदासो जन्मशुद्धेः सर्वाण्यपि सूत्राणि चित्रयामास। तत्र क्षेत्रशुद्धिः, आत्मशुद्धिः, गर्भभर्म चेति त्रितयं तत्रावश्यकम्। तत्र क्षेत्रशुद्धिर्नामानुरूपदारपरिग्रहः। अत एव पार्वतीजन्मने धरित्रीधरणक्षमसारः,[१] यज्ञाङ्गयोनिश्च, मेरुसखः स्थितिज्ञश्च हिमाचलः पितॄणां मानसीमतएवात्मानुरूपां मेनां नाम मुनीनामपि माननीयां कन्यां कुलस्य स्थितये विधिना उपायंस्त। तस्यां च समाधिमत्यां सत्यां भूधराणामधिपेनैतेन भव्या पार्वती सम्यक्प्रयोगादपरिक्षतायां नीतावुत्साहगुणेन भव्या सम्पदिव समुदपादि। यदुक्तं कुमारसंभवे [कु. १. १८]—

स मानसीं मेरुसखः पितॄणां कन्यां कुलस्य स्थितये स्थितिज्ञः।
मेनां मुनीनामपि माननीयामात्मानुरूपां विधिनोपयेमे ॥

१-२. 'यज्ञाङ्गयोनित्वमवेक्ष्य तस्य सारं धरित्रीधरणक्षमं च।
प्रजापतिः कल्पितयज्ञभागं शैलाधिपत्यं स्वयमन्वतिष्ठत् ॥ कु० १. १७

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सा भूधराणामधिपेन तस्यां समाधिमत्यामुदपादि भव्या ।
सम्यक्प्रयोगादपरिक्षतायां नीताविवोत्साहगुणेन संपत् ॥

कु. १. २२

- अत्र प्रथमे पद्ये यानि विशेषणानि तैर्निपुणं व्याख्याता दारशुद्धिः, तत्प्रयुक्ता क्षेत्रशुद्धिश्च, द्वितीये च यत् समाधिमत्त्वरूपं विशेषणं तेन व्याख्यातो गर्भाधानसंस्कारोऽपि ।

आत्मशुद्धये पुनः रघुवंशस्य द्वितीयः सर्गः । तत्रात्र दिलीपस्याध्यात्मं पर्यशोधि सुकविना रघुसदृशस्य गतिशीलस्य सुमेधसः सुतस्य लब्धये । तत्र यशोधनोऽपि दिलीपो गुरोर्वसिष्ठस्य नन्दिनीं नाम धेनुं वनाय मुञ्चति स्वयं च तामनुगच्छति । अनातप इवेमां शुश्रूषमाणो राजा २१ दिनानि व्यत्येति । २२ दिने गौरीगुरोर्हिमालयस्य गह्वरेऽलक्षिताभ्युत्पतनः सिंहस्तामिमां वसिष्ठधेनुमाकर्षति । तद्रक्षणाय तूणीरात् सायकमुद्दिधीर्षोरस्य पाणिः सायकपुङ्ख एव सक्तस्तिष्ठति । ततश्च चित्रार्पितारम्भ इव स्थितस्य प्रत्यक्षमभ्यर्णमेव चाततायित्वमाचरन्तं सिंहं स्प्रष्टुमप्यक्षममाणो दिलीपो मन्त्रौषधिरुद्धवीर्यो भोगीव स्वकीयैस्तेजोभिः स्वयमेव दह्यते, उच्यते च मनुष्यवाचा विहसता सिंहेनैव गां विहाय निवर्त्तितुम्, विज्ञाप्यते च देवदारुविशेषसीमाप्रविष्टाया गोः शरीरेणाशनायाप्रशमने शम्भुविहितोऽधिकारः । केयं स्थितिः । पुत्रार्थमागतेन राज्ञा गुर्वर्थोऽपि हीयते, तदपि च जाग्रद्भ्यामेव विलोचनाभ्यां मिषता । किं क्रियेत ? भगवतः शङ्करस्य नियमोऽनुल्लङ्घ्यः, गौश्च रक्षणीया । उभयमेतदेकेनैवोपायेन सुशकम् । तच्च तस्यामेव सीमायामभिप्राप्तस्य स्वशरीरस्य विनिमयेन । धेनुवद् राज्ञो दिलीपस्य शरीरमपि देवदारुविशेषसीमां प्रविष्टम् । ततश्च बुभुक्षितः सिंहो गां विहाय दिलीपशरीरेणापि पारणां कर्त्तुं क्षमते । किमत्र प्राप्तम् ! दीयेत वा देहो न वा । दाने वंशक्षयः, अदाने गुरुयज्ञार्थध्वंसः, लोकलज्जा च । अयं हि निर्णयक्षणः । यदि वा परीक्षाक्षणो दिलीपबुद्धिसम्पदः । तत्र 'दर्शितशिष्यभक्तिर्दिलीपः शस्त्रेणाशक्यरक्षं रक्ष्यं विनाश्यापि स्वयमक्षततया निवर्त्तितुं साधिकारः, नात्र धर्मध्वंसः शस्त्रभृतः क्षत्रियदारकस्ये'-ति स्वशरीरपरित्राणे वाचोयुक्तिः । शक्नुतेतरां

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दिलीपो निवर्त्तयितुम्, न क्षमेत गुरुस्तमुपालब्धुम्, उपदिशेच्चोपायान्तरं सन्ततिलाभाय गवान्तराराधनरूपम्, सर्वासामपि गवां सौरभेयीत्वस्य शास्त्रसिद्धत्वात्। न च निवर्त्तते दिलीपः। क्षत्रवृत्तिमुदस्य ब्रह्मवृत्तिमसावादत्ते। प्रणयं च कुरुते प्रीतिस्निग्धयाचनारूपं गवाक्रान्तरि सिंह एव शिवकिङ्करे। आत्मनो देहस्य विनिमयेनैव प्रस्तवीत्यसौ गोः संरक्षणम्। प्रतिपद्यते च दृढं हठरूपमाग्रहम्। न च त्यजति तं क्रियासमभिहारेणापि ताभिस्ताभिरुक्तिमुक्ताभिः प्रलोभ्यमानः, विप्रतीपमुपदिश्यमानः, प्रत्यक्षैकपरायणं शरीरात्मवादात्मकं लोकायतमतं च प्रमाणीकृत्य प्रतिनिवर्त्तितुमागृह्यमाणः। आत्मन एकातपत्रं जगत्प्रभुत्वं, नवं वयः, कान्तं वपुश्चोपेक्ष्य गोः शरीरस्य रक्षणाय दृढव्रतो दिलीप एष स्वकीयमेकान्तविध्वंसि शरीरमामिषपिण्डमिव सिंहायोपानयति तस्योग्रं निपातं चोत्पश्यन्नवाङ्मुखस्तिष्ठति। 'उत्तिष्ठ वत्से'-त्यमृतायमानं नभोमण्डलव्यापि वचो निशम्योत्थितो दिलीपः केवलां प्रस्नविणीं गां पश्यति। सिंहस्तत्र न दृश्यते। आसीदियं गोरेव माया दिलीपस्य व्रतं परीक्षितुम्। उत्तीर्ण एषोऽत्र। सेयमेकाऽऽत्मशुद्धिर्दिलीपस्य, यत्र स्वार्थापेक्षया गुर्वर्थस्य परिपालनं प्रमाणीकृतम्।

अथापराऽऽत्मशुद्धिः। प्रसन्ना नन्दिनी वरं वृणीष्वेति दिलीपमभ्यादिशति। सोऽपि सुदक्षिणायां वंशस्य कर्त्तारमन्तकीर्तिं च तनयं याचते हस्तौ समानीय। तथेति प्रतिपद्य 'पत्रपुटे दुग्ध्वा मदीयं पयो झटिति उपभुङ्क्ष्वे'ति च नन्दिनी तं समादिशति। किमत्र प्रतिपन्नम्? न किमपि, आदेशपालनं विहाय। न च नास्ति नन्दिनीदुग्धे दिलीपस्याधिकार इति वक्तव्यम् नन्दिन्या 'पुत्रे'-त्यामन्त्रितस्य दिलीपस्य तत्राधिकृतत्वात्। ननु नास्ति नन्दिनीदुग्धे नन्दिन्या एवाधिकारः वसिष्ठ एवात्राधिकृत इति न ह्येवोपभोक्तव्यमस्या आदेशेनास्याः पयो दिलीपेनेति पक्षः, सोऽयं नन्दिन्या दोषो यदनधिकृतं पदार्थमन्यस्मै प्रयच्छति, न तु ग्रहीतुः। दिलीपोऽत्राप्यवधत्ते, कर्त्तव्यं च प्रतिपद्यते—

वत्सस्य होमार्थविधेश्च शेषमृषेरनुज्ञामधिगम्य मातः।
औधस्यमिच्छामि तवोपभोक्तुं षष्ठांशमुर्व्या इव रक्षितायाः॥

[रघु० २. ६५] इति।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दिलीपः क्षितीशः। सर्वस्याप्यधिकारमर्यादामसौ रक्षितुमेव प्राप्ताधिकारः, परद्रव्यविनाशो हि क्षितीशस्य स्वधर्मविनाशः। स्वधर्मं च नाशयेत्, पुत्रं च लभेतेति नेदं नेदीयो वैवस्तवंशोद्भवस्य दिलीपस्य। एवं कृते वंशस्य कर्त्तैव पुत्रत्वेन लभ्येत, न त्वनन्तकीर्त्तिः। अकीर्त्तेरल्पकीर्त्तेर्वा पुत्रत्वेन लाभेऽपि नातिपरितोषस्तथाविधव्रतपरिपालनपटिमपरिस्पन्दविभ्राजमानस्य गोचारकस्य सम्राजः। किं च परस्याधिकारं विनाश्य लब्धेन पुत्रेण कथं नु सम्पद्येत पराधिकारस्य रक्षा। अस्ति च दिलीपः प्रजार्थव्रतकर्शिताङ्गः, न तु सुतार्थव्रतकर्शिताङ्गः। किं भवति।

इत्थं क्षितीशेन वसिष्ठधेनुर्विज्ञापिता प्रीततरा बभूव।
तदन्विता हैमवताच्च कुक्षेः प्रत्याययावाश्रममश्रमेण॥

२. ६७

अन्ते च—

स नन्दिनीस्तन्यमनिन्दितात्मा सद्वत्सलो वत्सहुतावशेषम्।
पपौ वसिष्ठेन कृताभ्यनुज्ञः शुभ्रं यशो मूर्त्तमिवातितृष्णः॥

२. ६९

तदित्थं यादृशं पुत्रं दिलीपश्चकमे स्वात्मैव पूर्वं तेन तादृशो निर्मितः। यदि वा रघुः पूर्वं दिलीपगर्भ आगतः तदुत्तरं निषेकविधिना सुदक्षिणागर्भे संक्रम्य प्राप्तपरिपोषः प्रसूतिमलब्ध। सेयं द्वितीयाऽऽत्मशुद्धिः।

गर्भभर्मणि च दिलीपः किं नु नाकरोत्। आप्तैर्भिषग्भिरसौ गर्भं पर्यपालयत्, सुदक्षिणायाः कृच्छ्रलभ्यमपि दोहदं च न व्याजघान। उत्पन्नं च सुतं रघुनाम्ना व्यपदिदेश—रघिधातोः गत्यर्थकत्वमवेत्य अवेत्य च गतावपि (१) श्रुतिपारगत्वम् (२) रिपुपारगत्वं चेति द्वयं विशेषम्।

'श्रुतस्य यायादयमन्तमर्भकस्तथा परेषां युधि चेति पार्थिवः।
अवेत्य धातोर्गमनार्थमर्थविच्चकार नाम्ना रघुमात्मसंभवम्॥'

३. २१

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

राष्ट्रस्य रक्षायै श्रुतिपारगत्वं रिपुपारगत्वं चेति द्वितयमेवेदं परममावश्यकम्। अतएवोच्यते कालिदासेनापि—

सेना परिच्छदस्तस्य द्वयमेवार्थसाधनम्।
शास्त्रेष्वकुण्ठिता बुद्धिर्मौर्वी धनुषि चातता ॥ [१. १९ इति,]

कातर्यं केवला नीतिः शौर्यं श्वापदचेष्टितम्।
अतः सिद्धिं समेताभ्यामुभाभ्यामन्वियेष सः ॥ [१७. ४७ इति च।]

सर्वोऽपि प्रज्ञावान् राष्ट्राध्यक्ष एवंविधमेवोत्तराधिकारिणमपेक्षते यः शास्त्रप्रमाणो भवेत्, भवेच्च परिपुष्टशरीराद्यात्मा, परेषु पराक्रमाय स्वमातृभूमिपरिरक्षणाय च। इदमेव कालिदासस्य दिलीपोऽपि व्यपैक्षतेति नूनं राष्ट्रव्यवहारदर्शी सुकविः।

प्रसूतोऽपि बालकः परिपोषाभावे शरीरधातून् क्षपयित्वाऽकिञ्चित्करो जायेतेति तत्राप्यवधानमपेक्ष्यते। दिलीपस्तत्रापि सन्नद्धः। उच्यते च कविना—

पितुः प्रयत्नात् स समग्रसम्पदः शुभैः शरीरावयवैर्दिने दिने।
पुपोष वृद्धिं हरिदश्वदीधितेरनुप्रवेशादिव बालचन्द्रमाः ॥
३. २२

इति। अत एव च युवा युगव्यायतबाहुरंसलः कपाटवक्षाः परिणद्धकन्धरो रघुः वपुःप्रकर्षाद् दिलीपमजयत्। [३. ३४]

शाकुन्तलेऽपीयमेव कथा। जातमात्रामेव शकुन्तलां मेनका परित्यजति, दुष्यन्तप्रत्याख्यातां च तां स्वयमुपेत्य मारीचाश्रमं नयति। कीदृशीयं माता। विपरीतमस्या अपत्यवात्सल्यम्। जातमात्रे हि शिशौ सर्वोऽपि स्निह्यति, पशुर्वा, पक्षी वा, मनुष्यो वा। प्रसवोन्मुखीं तनयां प्रति पुनोऽस्ति वात्सल्यं नियतम्। वस्तुतः मेनका स्वशरीरबन्धेन विश्वामित्रस्य तपः कन्यारूपेण पर्यणामयत्, तत्याज तत् कण्वाय महर्षये शकुन्तला-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्वाय सर्वदमनमातृत्वाय च। स्वर्वेश्येयं कथमिव स्पृशेत् भाविनो मध्यम-लोकपालस्य, राष्ट्रपतेः सर्वदमनस्य मातृत्वाय कल्पिष्यमाणं स्वस्या अपि कन्यायाः कायम्। अवहिता सा ममत्वं संवृणोति। कण्वाश्रमे प्राप्त-दुःष्यन्तप्रजानिषेकासावेव तनया यदा दुष्यन्तराजकुलं गच्छति तदा भूयोऽपि प्राप्यते दोषावसरः। राजवैभवे प्राप्तपरिपोषो गर्भो नूनं विलासैकपरायणो जायेत। नास्ति चार्थस्तादृशेन नृपपोतकेन। शकुन्तला ततोऽपनीयते, भूयश्च तपोभूमिमेव नीयते। कीदृशीम्, अन्तरिक्षे स्थिताम् लोकोत्तराम्, कस्य, इन्द्रजनकस्य भगवतो मारीचस्य, कया, स्वयं मेनकया। मेनकेयं सैव या रामायणे कैकेयी। सूत्रधारिणीयं सर्वस्यापि घटनाभिनयस्य। भरतस्तामेव तपोभूमिं कथं नीयते। स्वयं कण्वस्यैवाश्रमं कथं न प्राप्यते। द्वावत्र गुणौ। एकमुदारं दर्शनम्, अपरश्च देवजनकृत उपचारः। द्वितयमपीदम्—

'प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने
तीर्थे काञ्चनपद्मरेणुकपिशे पुण्याभिषेकक्रिया।
ध्यानं रत्नशिलागृहेषु विबुधस्त्रीसन्निधौ संयमो
यद् वाञ्छन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी।।'ति

चित्रितंतमां सुकविनानेन महमतिना।

सेयं शुद्धिचतुष्किका। इमामधिरूढः सुमेधा

आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः।
आगमैः सदृशारम्भ आरम्भसदृशोदयः।।

रघु० १. १५

इत्येवं चरितार्थजीवनयात्रो निरूप्यते, निरूप्यते च शोभनो यात्री, शोभनो नायकः, शोभनो राष्ट्रपतिः, शोभनश्च दार्शनिको महाकविभिः, नीयते च तस्यैव जीवनवृत्तबन्धेन साफल्यमात्मनः कविकर्म। तदिदं मानवशिल्पित्वं महाकवेः कालिदासस्य। एष च प्रायः समेषामेव महाकवीनां गुणो यदिमे मानवमेव केन्द्रीकृत्य कविकर्म कृतार्थयन्ति दर्शनादिवदेव।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कालिदासस्य विशेषः

असौ पुनः कालिदासस्य विशेषो यदसौ मानवं देवेभ्योऽप्यभ्यधिकं निरूपयति। कालिदासस्य मानवो देवेन्द्रमपि ककुद्मन्तं विधाय तस्य ककुदि स्थित्वा दैत्यान् हिनस्ति, कल्पवल्लीचीनांशुकेष्वात्मनो यशः समुल्लेखयति, गोत्रभिदोऽर्धासनमधिरुह्य च जयन्तप्रार्थितामपि हरिचन्दनाङ्कितां मन्दारमालां शेषारूपेण प्राप्नोति, कृतस्मितश्च देवेन्द्रः शेषामिमां मानवायैवोपप्रयच्छति, न तु स्वपुत्राय जयन्ताय। तथाहि— अजोन्मुखीमिन्दुमतीं सुनन्दा रघुवंशं परिचाययन्ती ब्रूते—

इक्ष्वाकुवंश्यः ककुदं नृपाणां ककुत्स्थ इत्याहितलक्षणोऽभूत्।
काकुत्स्थशब्दं यत उन्नतेच्छाः श्लाघ्यं दधत्युत्तरकोसलेन्द्राः॥

रघु० ६. ७१

महेन्द्रमास्थाय महोक्षरूपं यः संयति प्राप्तपिनाकिलीलः।
चकार बाणैरसुराङ्गनानां गण्डस्थलीः प्रोषितपत्रलेखाः॥

रघु० ६. ७२

ऐरावतास्फालन - विश्लथं यः सङ्घट्टयन्नङ्गदमङ्गदेन।
उपेयुषः स्वामपि मूर्त्तिमग्र्यामर्धासनं गोत्रभिदोऽभितष्ठौ॥

रघु० ६. ७३—इति।

कुशोऽपि समरे कुलोचितमिन्द्रसाहायकं कुर्वाणो हृतदुर्जयनिहतो दिवस्पतेः सिंहासनार्धभाग् तस्य पत्नी कुमुद्वती च पारिजातांशभागिनी—

तयोर्दिवस्पतेरासीदेकः सिंहासनार्धभाक्।
द्वितीयापि सखी शच्याः पारिजातांशभागिनी॥

रघु० १७. ७

शाकुन्तलस्य नायको दुष्यन्तोऽपि दैत्यान् निहत्य देवेन्द्रेण तदीये सिंहासनार्ध उपवेश्यते वक्षःस्थलचन्दनमृष्ट्या मन्दारमालया च तत्प्रार्थयितारं जयन्तमुपेक्ष्य संभाव्यते—

अन्तर्गतप्रार्थनमन्तिकस्थं जयन्तमुद्वीक्ष्य कृतस्मितेन।
आमृष्टवक्षोहरिचन्दनाङ्का मन्दारमाला हरिणा पिनद्धा॥

शा० ७. १

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तस्यास्य मर्त्यलोकाधिपस्यापि दुष्यन्तस्य यशो नाकपृष्ठे सुभगेन लिपिसन्तानेन उपरच्यते। तत्र सुरसुन्दरीणां विच्छित्तिशेषा वर्णा मषी, कल्पलतांशुकमक्षरभूमिः, लेखितारश्च दिवौकसः। तथाहि मातलिरुदीरयति—

विच्छित्तिशेषैः सुरसुन्दरीणां वर्णैरमी कल्पलतांशुकेषु।
विचिन्त्य गीतक्षममर्थबन्धं दिवौकसस्त्वच्चरितं लिखन्ति॥

देवेन्द्रस्य स्वपुत्रं प्रति स्मितम्, मर्त्यस्य च दिवौकोभिः कल्पलतांशुकेषु सुरसुन्दरीणां विच्छित्तिशेषैवर्णैर्यशोलिपिः। कोऽर्थः?

एष ननु,

दुष्यन्तकृतमुपकारं विना प्राप्त एवोपप्लवः सुरसुन्दरीणां विच्छित्तीनाम्, शङ्कितमहिमा कल्पलता, भ्रष्टवैभवश्च द्युलोकः। दिष्ट्या रक्षिता एते दैत्येभ्यः, किन्तु, केन? मानवेन, न तु देवेन्द्रेण, सुखपरेण। ततश्चाधुना कल्पलतापि मानवं स्वसुरक्षां भिक्षते, यशश्च तस्य स्वशिरसि धारयते। पारिजातादिकल्पवाटीमध्यवासिनो देवाः कल्पवृक्षेभ्यः किमपि न प्राप्तवन्तो येन दैत्यभयं निवार्येत, ततश्चाकिञ्चित्करा एव ते कल्पपादपा देवेभ्यः। इदानीं पारमार्थिकः कल्पवृक्षो दुष्यन्तात्मा मानव एव देवेभ्यः। एवं चास्य मानवस्याभिनन्दनं देवलोकस्यापरिहार्यं कर्त्तव्यम्। ततश्चैकतः पुत्रः अपरतश्च दैत्यभयनिवारणो मानुषः। एकतः कर्त्तव्यम् अपरतश्च ममत्वम्। उपकृतेन देवेन्द्रेणास्मिन् मानसिके द्वन्द्वे किं न्वनुष्ठीयेत? ममत्वं वाभिनन्द्येत कर्त्तव्यं वाभिपाल्येत। जागर्तितरां देवेन्द्रात्मनि विवेकज्योतिः। स हि ममत्वं पृष्ठतः कृत्वा कर्त्तव्यमभिपालयति, जयन्तमन्तिक उपवेश्य दुष्यन्तमर्धासन उपवेशयति, मन्दारमालायाः प्रार्थयितारमपि जयन्तमुपेक्ष्य अतादृशो दुष्यन्तस्य वक्षसि तां पिधापयति। सेयं सर्वापि कर्त्तव्य-कृतज्ञभाव-शिक्षा स्मितेन दीयते जयन्ताय।

देवेन्द्रस्य महत्तमं प्रहरणम् उर्वशी। विक्रमोर्वशीये सापि केशिनाऽऽच्छिद्यते। तामिमां पुरूरवा एव रक्षति। रक्षित्रे चास्मै नारायणोरुसंभवा स्वर्गललामभूताप्यसौ सुन्दरी स्वहृदयमुपहरति, तामिव देवेन्द्रः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अतएव लक्ष्मीभूमिकामधिरूढाया 'अस्या लक्ष्मीस्वयंवरे पुरुषोत्तम इति वक्तव्ये'[1] पुरूरवसीति स्खलनम्, देवेन्द्रस्य च नारदमुखेन सन्देशः—

नारदः प्रभावदर्शी मघवा वनगमनाय कृतबुद्धिं भवन्तमनुशास्ति, त्रिकालदर्शिभिर्मुनिभिरादिष्टो महान् सुरासुरसंगरो भावी। भवाँश्च सांयुगीनः सहायो नः। तेन न त्वया शस्त्रं संन्यस्तव्यम् इयं चोर्वशीयावदायुस्तव सहधर्मचारिणी भवत्विति।' विक्र० ५. १९–२०

नारदः पुरूरवसं स्पष्टमुपदिशति—

त्वत्कार्यं वासवः कुर्यात् त्वं च तस्येष्टमाचरेः।
सूर्यः समेधयत्यग्निमग्निः सूर्यं स्वतेजसा ॥
५. २०

ततश्चाचर्यते और्वशेयस्य कुमारस्य आयुषो यौवराज्याभिषेकसम्भारः स्वयं देवेन्द्रेणैवोपहृतैरप्सरोभिश्च विधृतैस्तैस्तैर्द्रव्यैः।

मानवेष्टसंपूर्त्तये देवजनाः शाकुन्तलेऽपि सचेष्टाः। तत्र ते मातलिं प्रेषयन्ति, तद्द्वारा च शकुन्तलाप्रत्याख्यानानुशयदिग्धमुन्मनसं दुष्यन्तमानयन्ति। घातितदैत्याश्च मारीचाश्रमे सपुत्रां शकुन्तलां तस्मा उपहरन्ति। त इमे मानवार्थघटका देवाः।

रघुवंशस्य नायको रघुः पुनर्देवेन्द्रेणैव युध्यति। 'न खल्वनिर्जित्य रघुं कृती भवानि'-ति च तमवहितं विधाय शरासनं सशरं करोति, प्रहरति च सौवर्णेन शरेण गोत्रभिदम्। अमर्षणो गोत्रभिदपि नवाम्बुदानीकमुहूर्त्तलाञ्छने धनुषि सायकं संधत्ते। भीमासुरशोणितस्वादाभ्यस्तः सोऽपि च सायको दिलीपसूनो रघोर्बृहद् भुजान्तरं प्रविश्यानास्वादितपूर्वं मनुष्यशोणितं कुतूहलेनेव पिबति। कुमारविक्रमो रघुरपि देवेन्द्रस्य सुरद्विपास्फालनकर्कशाङ्गुलौ शचीपत्रविशेषकाङ्कित च भुजे स्वनामचिह्नं सायकं निखनति, लुनाति च तदीयं शरासनज्यां शशाङ्कार्धमुखेन पत्रिणा। इदानीं महेन्द्रस्यैकमेव प्रहरणमवशिष्यते, तच्चाद्रि-

१. विक्रमोर्वशीये तृतीयाङ्कात्प्रजो मिश्रविष्कम्भः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ष्वप्यसङ्गं वज्रम्। प्रबलस्य विद्विषो रघोः प्रणाशनाय स्वार्थी वासवो वज्रमपि प्रयुङ्क्ते, किन्तु विफलो भवति विद्युतः प्रमापणे पयोधर इव। रघुर्वज्रव्यथामपि निमेषमात्रादवधुनोति, उत्तिष्ठति च भूयोऽपि महेन्द्रेण योद्धुम्।

रघुर्भृशं वक्षसि तेन ताडितः
पपात भूमौ सह सैनिकाश्रुभिः।
निमेषमात्रादवधूय तद्व्यथां
सहोत्थितः सैनिकहर्षनिस्वनैः॥—रघु० ३. ६१

इदानीमगतिको महेन्द्रो रघुमुपायान्तरेण युद्धोद्योगाद् विरिरि-मयिषति—

असङ्गमद्रिष्वपि सारवत्तया न मे त्वदन्येन विसोढमायुधम्।
अवेहि मां प्रीतमृते तुरङ्गमात् किमिच्छसीति स्फुटमाह वासवः॥
रघु० ३. ६३

इति प्रशंसावचनात्मकेन। रघुरपि निषङ्गादसमग्रमुद्धृतमिषुं प्रतिसंहरति महेन्द्रयाचितां भिक्षां च तस्मै प्रददाति 'अश्वरूपाम्'।

अत्र यथा महेन्द्रसायके मनुष्यशोणितस्यायमिदम्प्रथम आस्वाद-स्तथैव महेन्द्रेऽपि मनुष्यदत्त इदम्प्रथमः पराभवः। अत्र सुरद्विपा-स्फालनकर्कशाङ्गुलौ शचीपत्रविशेषाङ्किते च भुजे स्वनामचिह्नस्य सायकस्य यो निखातः स साभिप्रायः। तत्र सुरद्विप ऐश्वर्यस्य प्रतीकः, शची च पौरुषस्य। भुजश्च तयोर्द्वयोरपि साधिकारः। तस्मिन् भुजे स्वस्य नाम्नो लेख इन्द्रस्य वैभवं शक्तिश्चेत्युभयत्रापि रघोरधिकारस्य प्रख्यापना। तत्रापि चायमर्थो यद् य इमे मानवाः ते स्वतन्त्राः स्वायत्त-सिद्धयश्चेन्द्रपदमधिकर्तुम्। यच्चेन्द्रस्य वज्रं तदपि मनुष्ये प्रायेणानति-प्रयोजनकमेव।

इदमत्र मानवशक्तेर्दिव्यशक्त्यपेक्षया सारवत्त्वम्। वस्तुतो मध्यम-लोकपालो महेन्द्रश्चेति परस्परं सहयुध्वानौ सुहृदौ। 'मध्यमलोकपालो महेन्द्रमुपकरोति महेन्द्रश्च तम्' इति सम्पद्विनिमयेनोभावपि भुवनद्वयं दधतः। यदुच्यते कालिदासेनैव—

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'दुदोह गां स यज्ञाय सस्याय मघवा दिवम् ।
सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम् ॥

रघु० १. २६

अयं हि मानवस्य महिमा। कालिदाससाहित्येऽसौ महान् विशेषः। श्रीहर्षादयस्तत्र नावदधते। अयं पुनरमुमेव भावं स्थायिभावतां प्रापति।

२. अयं पुनः कालिदासस्यापरो विशेषो यदसौ राष्ट्रस्य वर्त्तमानमधीते। न केवलमधीते तत्रोपायमपि प्रणिदधाति। एतच्च कालिदासस्य कुमारसम्भव-रघुवंश-शाकुन्तलैः स्पष्टम्।

कुमारसंभवत्रयम्

एतानि त्रीण्यपि काव्यानि वस्तुतः कुमारसम्भवान्येव कुमारसंभवे यथा कुमारनाम्नः कार्त्तिकेयस्य संभवस्तथैव रघुवंशे रघोः संभवः, शाकुन्तले च शाकुन्तलेयस्य भरतस्य संभवः। संभवो नाम व्यवस्थितया योजनयाऽभीष्टगुणशालिनोऽपत्यस्य समासादनम्। कुमारः पार्वत्यास्तपःसमाधिना संभावितः, रघुर्दिलीपस्य तपोऽनुष्ठानेन, भरतश्च शकुन्तलायाः।

कालिदासस्य समयः प्रायेण पश्चिमोत्तरीयसीमाप्रदेशाद् हूणादीनामाक्रमणस्य समयः। तत्र संपूर्णस्यास्य देशस्य केन वोपायेन संरक्षणं क्रियेतेति प्रश्नः। ये तत्र नेतारस्तेषु कथं वा शौर्यविशेष उदियात्, कथं च तेषां मनांसि संयमाग्निपरिशुद्धान्येव तिष्ठेयुरिति च तदानीन्तनी समस्या। कालिदासस्तारकासुरहन्तारं कार्त्तिकेयं संभाव्य तमेव प्रश्नं समाधित्सति, तमेव च रघुमासाद्य रघुवंशे तमेव च सर्वदमनमासाद्य शाकुन्तले। कुमारसंभवस्य पात्राणि दिव्यानीति तेषु दृश्यमानो विक्रमः श्रद्धाप्रणामैकविषयः। न हि तद् मानवेषु सुलभम्। रघुवंशोपायः पुनर्मानवीय एव। तत्र पितुस्तपश्चर्यया पुत्ररत्नस्य रघोरुपलब्धिः। अस्ति च बुद्धिप्रधाने सूर्यवंशे पितुः प्रयत्नस्यैवोचितत्वम्। किन्तु न हि सर्व एव [1]बुद्धिप्रधाना एव भवन्ति। मनःप्रधानानामपि दृश्यमानत्वात्। तेषु

---

१. अतएवावोचाम सीताचरिते—

बुद्धिप्रधाना न हि सूर्यवंश्या देहेऽनुषक्तिं दधतिन्द्रियार्थे ॥ ९. ४१

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मातुरेव प्राधान्यम्। अतः [1]शकुन्तलागतं विश्वामित्रकण्वयोर्यत् तपः यच्च तस्याः स्वकीयं तपः, तेषां त्रयाणामपि संनिपातेन शैशव एव सिंहदन्तगणनोचितः सर्वदमनाभिधः पुत्र आसाद्यते। सेयं [2]युगावश्यकतापूर्त्तिः। अत्र कालिदास एवावहितः। माघसमये हर्षवर्धनपुलकेशिनोर्महत् युद्धमजायत। नास्ति च तत्रास्य दृष्टिः। श्रीहर्षस्यैव समये यवना आक्राम्यन्त भारतं वर्षम्। किन्तु नास्ति तत्रास्यावधानम्। तदानीमसौ दमयन्तीचिकुरप्रकरान् प्रशंसति, तस्याः शृङ्गारेण लोकत्रयमप्युद्वेलयति, कृत्रिमेणालङ्कारपारायणेन च चित्रानुवृत्तिमुपार्जयति। कालिदासः पुनः पुत्रेष्ववदधाति शल्योद्धारकेषु, वंशस्य देशस्य च।

मृत्युञ्जयत्वम्

३. अयं च कालिदासमहाकवित्वे तृतीयो विशेषो यदसौ मानवं मृत्युञ्जयभूमिकामारोपयितुमिच्छति। अतएवासौ पार्वतीं तपःसमाधिवह्निना परिशोधयति रघुं च योगसमाधिना।

पार्वतीतपोरहस्यम्

महाकविः कालिदासः कुमारसंभवस्य पञ्चमे सर्गे भगवत्याः पार्वत्याः क्लिष्टतमं तपो निबध्नाति। पार्वती स्वयं कुसुमसुकुमारा[3] तपश्च तस्याः पञ्चाग्नि-तपन[4]-क्रूरम्। या हि पार्वती महार्ह-शय्यासु[5] पार्श्वपरिवृत्तिपतितैः स्वकेशकुसुमैरपि दूयते स्म, सैव सा प्रतिक्षणं [6]विहितलोम-विक्रियां

---

१. सीताचरितेऽभिप्रायमिमं स्फुटयामः—

सुदक्षिणायां रघुरेव तद्वच्छकुन्तलायां भरतो हि जज्ञे।
अस्यामिमौ द्वौ ननु हेतुरत्र द्वयोस्तपांसि प्रसुवः पितुश्च ॥ १०. ५२

२. अतएवावोचाम काव्यालङ्कारकारिकायाम्—

युगावश्यकतापूर्तिमन्त्रव्यक्तिरपि क्वचित्।
प्रयोजनं रघोर्वंशे रघुव्यक्तिरिव स्थिरम् ॥ इति।

३. कुमार० ५. ४।

४. ५. २०। ५. ५. १२। ६. ५. १०।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्रिगुणां मौञ्जीं बिभर्त्ति बाहुलतोप[1]धायिनी एव चानुत्तरच्छदे स्थण्डिल एव निषेदुष्येव शेते। [2]अत्यन्तहिमोत्किरानिलाः शिशिर-शर्वरीः सा चिबुक[3]-दघ्न-सलिल-समाधिना नयति। स्वयंविशीर्णद्रुम[4]-पर्णवृत्तिता हि तपसः परा काष्ठा। पार्वत्या पुनरपर्णभूमिकामाश्रित्य स्थीयते। एवमियं क्लिष्टतपसां तापसानामपि[5] मानसानि सविस्मयानि विदधाति। महतोऽस्य तपसः प्रयोजनं—

इयं महेन्द्र - प्रभृतीनधिश्रियश्चतुर्दिगीशानवमत्य मानिनी।
अरूपहार्यं मदनस्य निग्रहात् पिनाकपाणिं पतिमाप्तुमिच्छति॥
५. ५३

इत्येवं सखीमुखेन प्रतिपादितवत्यपि अव्यञ्जितहर्षलक्षणेन[6] वर्णिना पृष्टा, पार्वती—

यथाश्रुतं वेदविदां वर त्वया जनोऽयमुच्चैः पदलङ्घनोत्सुकः।
तपः किलेदं तदवाप्ति - साधनं मनोरथानामगतिर्न विद्यते॥

इत्येवं स्वयमपि कण्ठरवेण भगवतः शङ्करस्य पतित्वेन लाभं तपसः प्रयोजनत्वेन प्रतिपादयति। एवं च

यदैव पूर्वे जनने शरीरं सा दक्षरोषात् सुदती ससर्ज।
तदाप्रभृत्येव विमुक्तसंगः पतिः पशूनामपरिग्रहोऽभूत्॥
१. ५३

स कृत्तिवासास्तपसे यतात्मा गङ्गाप्रवाहोक्षितदेवदारु।
प्रस्थं हिमाद्रेर्मृगनाभिगन्धि किंचित्क्वणत्किन्नरमध्युवास॥
१. ५४

तत्राग्निमाधाय समित्समिद्धं स्वमेव मूर्त्यन्तरमष्टमूर्त्तिः।
स्वयं विधाता तपसः फलानां केनापि कामेन तपश्चचार॥
१. ५७

---

१. ५. १२। २. ५. २७। ३. ५. २८।
४. ५. २८। ५ ५. २९। ६. ५. ६२।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति संदर्भेण सुकविः पार्वती-लाभाय भगवतः शिवस्यापि तपःसमुद्यमं पिशुनयति। शिवो हि भगवान्। तत एव च पूर्णकामः। पूर्णकामस्य तस्य परिग्रहाभावमात्रदग्धस्य सकामं तपः अन्यथानुपपद्यमानं सत् परिग्रहैक-प्रयोजनकं पर्यवस्यति। परिग्रहशब्दश्चात्र 'पत्नीपरिजनादानमूलशापाः परिग्रहा' इति कोषवचनात् पत्नीमात्रविषयः। जिघृक्षितस्य च परिग्रह-स्यापि पार्वत्याः सती-पुनर्भवत्वेन प्रतिपादनात् तत्पितुर्हिमाद्रेरेव च प्रस्थस्यानुष्ठानास्पदत्वेन दर्शितत्वात् पार्वतीमात्रपरत्वमत्र तिष्ठति।

एष हि विचित्रो जामाता यो यस्य पुत्रीं कामयते तस्यैवालिन्दे तपस्यति।

कुमारसंभवस्य तृतीयं सर्गं यावत् स्थितां कथां विद्वद्भिरिदं विज्ञायत एव यत् पदयोः अभ्युन्नताङ्गुष्ठनखप्रभाभिः[1] स्थलारविन्दश्रियमव्यवस्थां नयन्ती, पीयूष- [2]स्रुता स्वरेण ताड्यमानाः वितन्त्रीरिव परभृतः प्रति-कूलशब्दाः विदधती, संभूय समुत्थं त्रिलोकसौन्दर्य[3]मिवादाय प्रकटिततनु-लतिका पर्वतेश्वरकन्यका भगवती पार्वती यमेव नाम स्वसौभाग्येनाप-चचीषति, तस्या एव कृते तपः कुर्वाणः सन्नपि स एव शिवस्तस्या एव समक्षं देवजनानुरोधमवधीर्य—

क्रोधं प्रभो संहर संहरेति यावद् गिरः खे मरुतां चरन्ति।
तावत् स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार॥

३.७२

इत्युक्तिदिशा दाम्पत्यदैवतं मनोभुवमेव निरञ्जयति, अरूपहार्यतां चार्जयति। तर्हि केयं स्थितिः। अनुगुणयोर्नायकयोरसति प्रतिबन्धे सति च सांमुख्यलाभे सोयमसंप्रयोगो नूनं विस्मयावहः। सिद्धसरस्वतीकस्य शृङ्गारयोजनासु पटिष्ठस्य महतः कवेः कालिदासस्य सर्गबन्धेऽस्मिन्नेवं घटयतः का नामाकूतिः?

तपश्चरणात् पूर्वं भगवती पार्वती यत् सौन्दर्यमुपचिकाय रतेरपि लज्जापदमादधानमापे तद् अनश्वरं नासीत्। तदेवं भगवान् शङ्करो यथा

१. १. ३३। २. १. ४४। ३. ५. ४१।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मृत्युञ्जय आसीत् न तथा तस्य परमप्रेमास्पदं प्रिया । अत एव सतीशरीरं यावत् तस्याः शरीरधातवो बहुवारं व्यशीर्यन्त । पार्वतीजन्मन्यपि तथा तृतीयं सर्गं यावत् प्रतिपादितया कथया तथाविधं किमपि नाचरितं येनेयं शरीरनित्यत्वमाप्तुं प्रभवेत् । शरीरस्यैव च नित्यत्वं वस्तुतः स्पृहास्पदं नित्यत्वम् । आत्मतत्त्वस्य नित्यतायाः स्वयं सिद्धत्वात् । ते हि निराशा निष्फलाशा वा जना ये स्थूलेन शरीरेण नित्यत्वमलभमानाः स्वयंनित्य-स्यात्मतत्त्वस्य नित्यत्वेन तुष्यन्तस्तिष्ठन्ति । मरणाद् भिया हि अमरत्व-माकांक्ष्यते । न च ततो भयमात्मतत्त्वे भवितुमुपपद्यते । यत्र चोपपद्यते तद्धि केवलं स्थूलमेव शरीरम् । शरीरस्यैव च नित्यत्वायास्माकं प्रस्था-नानि प्रतिष्ठन्ते । तदेवैकमुद्दिश्य नचिकेतोयाज्ञवल्क्यादिवृत्तान्ताः श्रुतिषु प्रथिताः । एतदेव चावाप्य भगवान् शङ्कर एवान्ययोगव्यवच्छेदेन महा-देवत्वं भजते । स एवैको देवो यो हि विलीनेष्वविलीनस्तिष्ठति । ब्रह्माणं यावदन्ये सर्व एव देवा दामोदरस्योदरदरीं प्रविशन्तो विदिताः कदलीपत्र-गर्भन्यायेन । अत एव च भगवान् शङ्कर एव 'पशुपतिः','भूतपतिः' इत्यादि विरुदजातं सत्यापयते । स एव च शरीरेण चिदंशेन च नित्यत्वात् पूर्णतया सर्वतोभावेन च मृत्युञ्जय इति जेगीयते । ये हि शरीरेण नामृ-तास्ते चिदात्मना अमृता अपि मृता एव लेशतः । ततो देवाः सन्तोपि ते न मृत्युञ्जयाः ।

भारतीया प्रज्ञा भगवतः शङ्करस्य मृत्युञ्जयत्वनिदानमपि सम्यक् निरूपयति । ब्राह्मणग्रन्थेभ्यः पुराणसाहित्यं यावद् भगवानेष सपरिकर-मष्टमूर्तित्वेन निरूप्यते । "अष्टमूर्त्तित्वमप्यस्य मृत्युञ्जयत्वमिवैवानन्य-सामान्यम् । न हि किंचिदपि देवान्तरमागमेषु तथा प्रथितम् । अस्मन्मते भगवतः शङ्करस्याष्टमूर्त्तित्वमेव हि तन्निदानं येनासौ शरीरेणापि नित्यः, ईश्वरपदवाच्यश्च । महाकविः कालिदासोऽपि भगवन्तमिममनेकवारमनेकेषु स्थलेष्वष्टमूर्त्तिनाम्ना व्यपदिशति यावदत्रापि पूर्वोद्धृते पद्ये अष्टमूर्त्तिपदेनैव व्यपदेशमस्य करोति "स्वमेव मूर्त्यन्तरमष्टमूर्त्तिः"-इति । शाकुन्तलस्य नान्दीपद्ये तस्यास्येमा अष्टावपि मूर्ती रेकैकशः स्फुटमुद्दिशत्यपि । तथाहि—

१. या सृष्टिः स्रष्टुराद्या (जलम्)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

२. वहति विधिहुतं या हविः (अग्निः)
३. या च होत्री (यजमानः)
४-५. ये द्वे कालं विधत्तः (सूर्याचन्द्रमसौ)
६. श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् (आकाशम्)
७. यामाहुः सर्वबीजप्रकृतिरिति (पृथिवी)
८. यया प्राणिनः प्राणवन्तः (वायुः)

प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः"—इति।
अत्र हि महाभूतान्यपि पञ्च भगवतो मूर्त्तित्वेन [1]गणितानि।

मूर्त्तीनामेतासां विषये पटनास्थ'काशीप्रसादजायसवाल'शोधसंस्थानतः प्रकाशितस्यास्मत्सम्पादितस्य रघुवंशदर्पणस्य भूमिकायामस्माभिर्विषयेऽस्मिन् भूम्ना व्यचारि, व्यचारि चास्मन्निर्देश एव रायपुर-विश्वविद्यालयतोऽमुमेव विषयमवलम्ब्य डॉ० नन्हेप्रसादद्विवेदिना विरचिते 'संस्कृतवाङ्मयेऽष्टमूर्त्तितत्त्वम्' 'इति शोधग्रन्थे। तच्च तत एवावधार्यम्।

इदमत्रावसेयं यद् भगवान् शङ्कर एताभिरष्टाभिर्मूर्त्तिभिः प्रकृतिरूपोऽपि संजायते। ब्रह्म-विष्णु-शिवानां—

नमस्त्रिमूर्त्तये तुभ्यं प्राक् सृष्टेः केवलात्मने।
गुणत्रयविभागाय पश्चाद् भेदमुपेयुषे॥

कुमार० २. ४

नमो विश्वसृजे पूर्वं विश्वं तदनु बिभ्रते।
अथ विश्वस्य संहर्त्रे तुभ्यं त्रेधास्थितात्मने॥

रघु० १०. १६

किं येन सृजसि व्यक्तमुत येन बिभर्षि तत्।
अथ विश्वस्य संहर्ता भागः कतम एष ते॥

कुमार० ६. २३

एकैव मूर्त्तिर्बिभिदे त्रिधा सा सामान्यमेषां प्रथमावरत्वम्।
विष्णोर्हरस्तस्य हरिः कदाचिद् वेधास्तयोस्तावपि धातुराद्यौ॥

---

१. मूर्त्तीनामासां विषये द्रष्टव्याऽस्माकं पटनाकाशीप्रसादजायसवालशोधसंस्थानतः प्रकाशितस्य रघुवंशदर्पणस्य भूमिका।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

[कुमार० ७. ४४] इत्येवमभेदं प्रदर्शितवता कविना ब्रह्माणं प्रति यत्—

त्वामामनन्ति प्रकृतिं पुरुषार्थप्रवर्त्तिनीम् ।
तद्दर्शिनमुदासीनं त्वामेव पुरुषं विदुः ॥

कुमार० २. १३

इति प्रकृतित्वं प्रादर्शि तस्य शिवेऽपि संगतत्वात् तस्य शिवेऽपि प्रकृतित्वमभिमतमिति प्रतीयते । प्रकृतिश्च दार्शनिकेषु प्रायेण नित्यतया संमतापि परिणामं विरहय्यावस्थिता नास्ति । सा हि यदा सत्त्व-रजस्तमसां साम्यावस्थां भजते तदा सर्वासामेव नानाविधाभिव्यक्तिभाजां मूर्तीनामव्यक्ततारूपो विलयो जायते । स एव महाभूतविश्लेषरूपः पञ्चत्वापरपर्यायो मृत्युः प्रकृतेर्नित्यत्वमापादितवतामपि ध्रुव एव शरीरे । शिवश्च तत्रापि जितमृत्युः । स हि विषमपि पीत्वा स्वस्थशरीरो मृत्युञ्जयश्च । देवान्तराणि च पीयूषान्धस्त्वेन कोषेषु संज्ञापितान्यपि महाप्रलयावसरे विनश्वरशरीरबन्धानि, ब्रह्मोदरलीन-निकायानि पुण्यक्षये च संक्षीणामरभावानि । भगवति शङ्करे स्थितस्यास्य देवान्तरासाधारणस्य मृत्युञ्जयत्वस्य कारणं तस्य तपःसमाधिरेव । मतश्चासौ भावो भारतीयेभ्यो विचारकेभ्यः । अत एव तेषामस्मिन्नेव केवले भगवति 'योगीश्वर'—इति बुद्धिः यथा भगवति श्रीकृष्णे 'योगेश्वर' इति । अस्याश्च योगभूमिकायाः संपूर्णं प्रतिबिम्बं कालिदास एव कुमारसंभव एव तृतीये सर्गे 'प्रान्तेषु संसक्तनमेरुशाखं ध्यानास्पदं भूतपतेर्विवेश' इति ४३–पद्यत आरभ्य 'स्मरस्तथाभूतमयुग्मनेत्रं पश्यन्नदूरान्मनसाप्यधृष्यम्' इति ५१–पद्यं यावत् निपुणं प्रस्तवीति । "योगात् स चान्तः परमात्मसंज्ञं दृष्ट्वा परं ज्योतिरुपारराम"-इत्येमन्यत्रापि चासाविममर्थं न न दर्शयते । अत्र भूतपतिशब्दः सविशेषं ध्येयः । योग एव स उपायो येन भूतपतित्वमवाप्यते, अन्यथा तु सर्वेषामेव भूतानां केवलो यमराज एव पतिः । इत्थं भगवान् शङ्करः अष्टमूर्त्तित्वेन भूतपतिः, पशुपतिः, महादेवः, देवदेवः, मृत्युञ्जयः, ईश्वरः, ईशः, योगीशः, विषभुक् चेत्यादिभिरसाधारणैः संज्ञानैः संज्ञाप्यते, विद्यते च श्वेतभूपमार्कण्डेयादिकथानकैरुपवर्णितमाहात्म्यः ।

योगात् परमात्मसंज्ञं ज्योतिर्गोचरीकृत्य व्युत्थितस्य वसन्तपुष्पाभरणाया भगवत्याः पार्वत्या बिम्बफलाधरोष्ठे व्यापारिताक्षित्रितयस्य चास्य

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मानसं पुष्पसायकाक्षिप्तः सायको यावदाकुलयति धैर्यं चास्य परिवर्तयति तावदेव समुदेतितरामस्मिन् पार्वत्याः शरीरधातूनां मृत्युग्रासत्वप्रतिभा। ततश्चासौ निगृह्णीतेतरां करणक्षोभमात्मेश्वरत्वाद् बलवत्[1]। तथा हि

अथोपनिन्ये गिरिशाय गौरी तपस्विने ताम्ररुचा करेण।
विशोषितां भानुमतो मयूखैर्मन्दाकिनीपुष्करबीजमालाम्॥

प्रतिग्रहीतुं प्रणयिप्रियत्वात्त्रिलोचनस्तामुपचक्रमे च।
संमोहनं नाम च पुष्पधन्वा धनुष्यमोघं समधत्त बाणम्॥

हरस्तु किंचित् परिलुप्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि॥
अथेन्द्रियक्षोभमयुग्मनेत्रः पुनर्वशित्वाद् बलवन्निगृह्य।
हेतुं स्वचेतोविकृतेर्दिदृक्षुर्दिशामुपान्तेषु ससर्ज दृष्टिम्॥

कुमारसंभवे ३. ६५–६७, ६९

येनेदानीमसावाकृष्टस्तद्धि पार्वत्याः शारीरमेव सौन्दर्यम्। तदेव च सुकविरेष संस्कृतसाहित्ये प्राणानिवादधद् विदधच्च युगयुगेभ्यः सुमनोजनहृदयहारमितः पूर्वमेवं व्यावर्णयामास—

निर्वाणभूयिष्ठमथास्य वीर्यं संधुक्षयन्तीव वपुर्गुणेन।
अनुप्रयाता वनदेवताभ्यामदृश्यत स्थावरराजकन्या॥

अशोकनिर्भर्त्सितपद्मरागमाकृष्टहेमद्युतिकर्णिकारम्।
मुक्ताकलापीकृतसिन्दुवारं वसन्तपुष्पाभरणं वहन्ती॥

आवर्जिता किंचिदिव स्तनाभ्यां वासो वसाना तरुणार्करागम्।
पर्याप्तपुष्पस्तबकावनम्रा संचारिणी पल्लविनी लतेव॥

स्रस्तां नितम्बादवलम्बमाना पुनः पुनः केसरदामकाञ्चीम्।
न्यासीकृतां स्थानविदा स्मरेण मौर्वीं द्वितीयामिव कार्मुकस्य॥

सुगन्धिनिश्वासविवृद्धतृष्णं बिम्बाधरासन्नचरं द्विरेफम्।
पुनः पुनः संभ्रमलोलदृष्टिर्लीलारविन्देन निवारयन्ती॥

---

१. कुमा० ३. ६५–६७, ६९

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तां वीक्ष्य सर्वावयवानवद्यां रतेरपि ह्रीपदमादधानाम् ।
जितेन्द्रिये शूलिनि पुष्पचापः स्वकार्यसिद्धिं पुनराशशंसे ॥

कुमा० ३. ५२–५७

एतस्य सर्वस्यापि वर्णनस्यार्थः केवलमयमेव यत् पार्वत्याः सुन्दरेण शरीरेणैव कामः शङ्करस्येन्द्रियेषु क्षोभमुपजनयितुमियेष। शङ्करश्च न केवलं पार्वत्याः शारीरं सौन्दर्यमेव परिजहार, तदादाय प्रयुक्तसंमोहनं कुसुमधन्वानमप्यसौ निरङ्गत्वाय विप्लोषयाञ्चक्रे, अकिञ्चिदुक्त्वैव चान्तर्दधे। भूतान्यपि स्वानि तिरोधापयाम्बभूवे। तत्र हिमाद्रिप्रस्थे तत्यजे केवला पार्वतराजपुत्री पार्वत्येव। एतैश्च भगवद्व्यापारैरेकतः कामस्य कपोतकर्बुरेण शरीरभस्मना धूसरं स्तनसंबाधमुरस्ताडयन्ती कामप्रिया रुरोद, रोदयामास च माधवमपि कामसुहृदम्, परतश्च भगवती पर्वतरापुत्री पार्वत्यपि स्वकीयं रूपं हृदयेन निनिन्द। यदुक्तम्—

तथा समक्षं दहता मनोभवं पिनाकिना भग्नमनोरथा सती।
निनिन्द रूपं हृदयेन पार्वती प्रियेषु सौभाग्यफला हि चारुता ॥

५. १

अत्र हि रूपपदेन रूप्यते दृश्यते चक्षुर्विषयीक्रियत इति व्युत्पत्त्या गुणविशेषः तद्युक्तं स्थविष्ठं वपुश्च विषयीक्रियते। केवलं रूपेण युक्तं शरीरमात्रं तारकारिं कुमारशक्तिं जनयितुं न क्षमते स्म, न च मृत्युग्रस्तं तत् सौभाग्यस्याप्यखण्डतां वा लब्धुम्। प्रिय-सौभाग्यपदेन चात्र संदर्भतो यद्यपि प्रियजनितं प्रियाया एव सौभाग्यं द्योत्यते तथापि एकशेषविधया प्रियाजनितं प्रियस्यापि तन्न न व्यज्यते। 'सौभाग्यं ते सुभग विरहावस्थया व्यञ्जन्ती'-त्येवं मेघदूते मेघं प्रति तत्प्रणयिनीत्वेन प्रतिपादितया सरिता दर्शितं सौभाग्यमपि कालिदासो दर्शयति। अमृत्युञ्जयत्वे पार्वत्याः सकाशादागतं मृत्युञ्जयस्य भगवतः शङ्करस्य सौभाग्यं कथमिवेदं कामयेत? सतीविनाशादनुभूतसौभाग्यनाशक्लेशः पुनरसौ खण्डितमेव स्यात्। स हि सौभाग्यस्याखण्डितत्वाय तदालम्बनभूतस्य शरीरस्याप्यखण्डितत्वमेव कामयत एव। पार्वती च 'रूपस्यावन्ध्यतां कर्तुं तपःसमाधिमास्थित, तेन च कालेश्वरं पतिमाप्तुमाशशंसे'—

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इयेष सा कर्तुमबन्ध्यरूपतां समाधिमास्थाय तपोभिरात्मनः ।
अवाप्यते वा कथमन्यथा द्वयं तथाविधं प्रेम पतिश्च तादृशः ॥

इत्येवमत्र सर्गारम्भ एवाग्रथ्नात् निर्व्यभिचारम् । तेन च तपःसमाधिना पार्वत्या अपि शरीरं कालेश्वरं मृत्युञ्जयं च संजायते । ततश्च सा कुमारशक्तिमप्युत्पादयितुं क्षमतामाधत्ते । अस्या मृत्युञ्जयत्वलाभं कविस्तपोवर्णनेन दर्शयिष्यन् भगवतः शङ्करस्याष्टमूर्त्तिसात्म्यमपि संकेतयते । पार्वती हि तपःक्रमेण सूर्यादिरूपामेकैकां भगवन्मूर्तिमुपास्ते, सचिनुते च क्षमां तस्याः प्राकृतमुपघातं च सोढुम् । एवञ्च पार्वती—

१. नवोटजाभ्यन्तरसंभृतानलं
तपोवनं तच्च बभूव पावनम् ॥ ५. १७ (यजमानत्वम्)
२. विजित्य नेत्रप्रतिघातिनीं प्रभा
मनन्यदृष्टिः सवितारमैक्षत ॥ ५. २१ (सूर्यत्वम्)
३. रसात्मकस्योडुपतेश्च रश्मयः,
बभूव तस्याः किल पारणाविधिः ॥ ५. २२ (चन्द्रत्वम्)
४. शिलाशयां तामनिकेतवासिनीम् ॥ ५. २५ (आकाशत्वम्)
५-६. निनाय सात्यन्तहिमोत्किरानिलाः
सहस्यरात्रीरुदवासतत्पराः ॥ ५. २६ (वायुजलत्वे)
७. शुचौ चतुर्णां ज्वलतां हविर्भुजां
शुचिस्मिता मध्यगता सुमध्यमा ॥ ५. २० (अग्नित्वम्)
८. स्वयंविशीर्णद्रुमपर्णवृत्तिता
परा हि काष्ठा तपसस्तया पुनः ॥ ५. २८ (पृथिवीत्वम्)

इत्येवं यजमानादिसात्म्यं प्राप्नुते, प्राप्नुते च स्वयमप्यष्टमूर्त्तिभावम् ।

विरोधिसत्त्वोज्झितपूर्वमत्सरम् ॥ ५. १७ इति,

मुखेन सा पद्मसुगन्धिना निशि ॥ ५. २७ इत्येवमागतास्तत्र सत्त्वशुद्धि-शरीरशुद्धयुपलक्षिता योगसिद्धयः । या च मानसी शुद्धिस्तामसौ भगवतः शङ्करस्य दोषानुद्भाव्य तदुत्तरव्याजेन—

'अलोकसामान्यमचिन्त्यहेतुकं द्विषन्ति मन्दाश्चरितं महात्मनाम्' ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इत्यादि कथयित्वा व्यानञ्ज। एवं च प्राप्ताष्टमूर्त्तित्व-मृत्युञ्जयत्वकालेश्वरत्व-योगीश्वरत्वामिमां भगवान् स्वयमेवोपेत्य परिगृह्णाति, दासत्वं चास्यै स्वस्य निवेदयति—'अद्य प्रभृत्यनवताङ्गि ! तवास्मि दास' इति।

इत्थं कालिदासो दाम्पत्य-सौभाग्यस्य शाश्वतिकत्वायापेक्षितं शरीरस्यामृतत्वं मृत्युञ्जये भगवतीव भगवत्यामपर्णायामपि तपः-समाधि-व्याजेन साधयते, तेनैव च क्रमेणास्या अष्टमूर्तित्वलाभमपि दर्शयते, ततश्च तारकारिशक्तिजननक्षमतामपि निष्पादयते, शिक्षयते चास्मान् शारीरस्यामृतत्वमस्य लाभोपायम्, तदुपायभूतं दाम्पत्याखण्डितत्व-विधये समुद्भावितं भारतीयमुपक्रमं च। एवं मृत्युञ्जयत्वमेव हि पार्वती-कृतस्य तपसो रहस्यम्।

रघोर्मृत्युञ्जयत्वम्

रघुरपि श्लाघ्यजायासमेते कुलधुर्ये अजे कुटुम्बमुपधाय स्वकुलोचितं शान्तिमार्गमाश्रयते [र० ८. १०-११]

अथ वीक्ष्य रघुः प्रतिष्ठितं प्रकृतिष्वात्मजमात्मवत्तया।
विषयेषु विनाशधर्मसु त्रिदिवस्थेष्वपि निस्पृहोऽभवत्॥
गुणवत्सुतरोपितश्रियः परिणामे हि दिलीपवंशजाः।
पदवीं तरुवल्कवाससां प्रयताः संयमिनां प्रपेदिरे॥

इत्येवमसौ तामेव दिशमाश्रयते यां भगवान् शिवः भगवती पार्वती च विवाहात् पूर्वमाशिश्रियाते। तथाहि विषया रूपादयः। ते च विनाश-धर्माणः। तेषामेव सातिशयं रूपं स्वर्गः। तस्य या स्थितिस्तामसावि-न्द्रगतेन दैन्येनान्वमिमीतैव। ततश्च ततोऽप्यसौ पराङ्मुखः। सेयम-त्रापि मृत्युबिभीषा। एवं चासावपि योगसमाधिमाश्रयते। सर्पस्त्वचमिव व्यपवर्जितां श्रियमुपेक्ष्य प्रशममात्रपरायणो 'भवति। एकतः प्रशमस्थितो रघुः, अपरतश्चाभ्युद्यतस्तत्पुत्रोऽजः। निवृत्तिप्रवृत्तिसमुद्यताभ्यामाभ्यां सूर्यवंशो निभृतेन्दुना, समुदितार्केण च नभसा तुल्यम्—[रघु. ८.१५]

---

१. रघु० ७.७१। २. ८.१३।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रशमस्थितपूर्वपार्थिवं कुलमभ्युद्यतनूतनेश्वरम् ।
नभसा निभृतेन्दुना तुलामुदितार्केण समारुरोह तत् ॥

रघुरेषोऽनपायिपदमुपलिप्सुर्योगिभिः[१] समेति, कुशपूतं विष्टरमादत्ते धारणां चोपांशु [२]परिचिनोति । प्रणिधानयोग्यया शरीरगोचरान् पञ्च मरुतो वशं [३]नयति । स्वकर्मणां फलानि ज्ञानमयेन वह्निना भस्मसात्[४] करोति । गुणत्रयं विजित्य लोष्टकाञ्चनयोः समदर्शितामाप्नोति[५] । एवं च परमात्मदर्शनावधि स्थिरकर्मा रघुर्योगविधेर्नोपरमति[६], अन्ते चापवर्ग-सिद्धिं तथैव लभते यथा तस्यैव पुत्रोऽभ्युदयसिद्धिम्[७] । अथाजव्यपेक्षया काश्चित् समा गमयित्वा समदर्शी रघुर्योगसमाधिना तमसः परमव्ययं पुरुषमाप्नोति—'अथ काश्चिदजव्यपेक्षया गमयित्वा समदर्शनः समाः ।
तमसःपरमापदमव्ययं पुरुषं योगसमाधिना रघुः[८] ॥

रघुवदेव सोमसुतोऽपि ब्रह्मभूयां गतिं गच्छति ।[९] पुष्योऽपि जैमिनि-मुनेर्योगविद्यामधिगम्याजन्मने कल्पते[१०] । सुदर्शनोऽपि पश्चिमे वयसि तनयारोपितश्रीर्नैमिषतीर्थे फलनिस्स्पृहतया तपः संचिनोति ।[११]

एवं पुरुषेषु रघुप्रभृतयः, स्त्रीषु च पार्वती मृत्युञ्जयत्वमधिगताः । रघुवंशे भगवती सीता भुवो रन्ध्रं प्रविशति यस्माद् नागफणोत्क्षिप्त-सिंहासना माता भूमिः प्रकटति । अयमपि कुण्डलिनीजागरणप्रतीकः । इममिमे सीताचरिते यथायथं न्यरूपयाम । तत्र सीता कर्त्तव्यान्यशेष-यित्वाऽव्युत्थानं समाधिबन्धमावध्नाति[१२], प्रशस्यते च—

इयं कल्याणी तां स्थितिमुपगता यां स्पृहयते
मुनीन्द्राणामात्मा शतशततपोऽनुष्ठितिपरः ॥

---

१. रघु. ८.१७ । २. रघु ८.१८ । ३. रघु. ८.१९ ।
४. रघु. ८.२० । ५. रघु. ८.२१ । ६. रघु. ८.२२ । ७. रघु. ८.२३ ।
८. रघु. ८.२४ । ९. रघु. १८.२८ । १०. रघु. १८.३३ । ११. रघु. १९.२ ।
१२. सीताचरिते १२.६५-७१ ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रतिष्ठेयं जाता निमि-रवि-महावंशयशसां
प्रतिष्ठेयं जाता युगयुगकृते भारतभुवः ।
प्रतिष्ठेयं जाता श्रुतिमहति मार्गे कृतधियां
यदेषा देहेन स्थितिमधित मृत्युञ्जयभुवः ॥ एवम् ॥

—सीताचरिते १०. ७३-७४

अविमुक्तश्वासपरम्परा सेयं यज्ञभस्म-गङ्गाजल-पुष्पपरागैर्मिश्ररजस्के वाल्मीकि-वसिष्ठ-जनक-राम-कुशलवादिः खाते गर्त्ते समाधीयते—

गाङ्गैस्तोयैरथ नयनजैर्दिग्धदिग्धैः पवित्रं
श्रद्धापुष्पैः शबलशबलं खातमेते विधाय ।
तस्या गात्रं पुनरपि महीमातुरेवाङ्कशय्या-
ऽऽसीनं चक्रुर्नहि मृतवपुर्मन्यते योगमुक्तः ॥ इति ।

सीताचरिते १०. ७७

अस्त्येवं कालिदासोऽसाधारणो महाकविः, अद्वितीयश्च शिल्पी। यदिदमस्य शिल्पम्, अस्य विषय एक एव। स च मानवः, शुद्धिमान् मानवः, श्रुतपारदृश्वतासध्रीचीनेन शत्रुसंहारसामर्थ्येन ततश्च राष्ट्रप्राणेन वीर्यातिशयेन विभूषितो मानवः; स मानवः, फलनिःस्पृहत्वेन यः स्वधर्ममाचरति, निश्श्रेयसं चाधिगच्छति सर्वविधाभ्युदयानुजम्।

दर्शनम्

इयं या मानवस्याभ्युदयनिश्श्रेयसयात्रा सैव कवेरस्य दर्शनम्। दर्शनस्य चास्य शोभनं संज्ञानम् 'आत्मभूदर्शनम्' इति। आत्मभूरेष नीललोहितः परिगतशक्तिश्च[1]। असौ पुनर्भवमपि क्षपयति। कोऽर्थः? नन्वसौ—

आत्मनः सकाशादात्मने हिताय यो भवति स एवात्मभूः। आत्मा च शरीरतश्चैतन्यं यावत् संख्यायमानानां समेषामपि पुरुषनिकायघटकानां

१. तथा च शाकुन्तलभरतवाक्योत्तरार्धम्
'ममापिच क्षपयतु नीललोहितः पुनर्भवं परिगतशक्तिरात्मभूः ॥'

५

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

समष्टिः। एतेषां या चैतन्याभिमुखी यात्रा सैव मानवीयः धर्मः, सैव च मानवीयं दर्शनम्। अस्यां च यात्रायां 'मनः, बुद्धिश्चे'-ति द्वितयमप्यन्तः-पतति। तत्र शरीरमनसोरात्मभूः कामः, बुद्धेरात्मभूः प्रसंख्यानम्। आनु-लोम्येन प्रवृत्तिरत्र धर्मः, प्रातिलोम्येन तु सैवाधर्मः। शिव आनुलोम्येन प्रवर्त्तते। स हि वासन्तिके वैभवे परिबाधमानेऽपि प्रसंख्यानपर एव—

श्रुताप्सरोगीतिरपि क्षणेऽस्मिन् हरः प्रसंख्यानपरो बभूव।
आत्मेश्वराणां नहि जातु विघ्नाः समाधिभेदप्रभवो भवन्ति॥'

शिव एष नीललोहितः, नीलश्चासौ लोहितश्चेति। नीलत्वं नाम तमः, लोहितत्वं च रजः। अज्ञानं तमश्चेत्येकोऽर्थः। यच्चाज्ञानं तदेव माया, तदेव च जगत्। तत्र च दाता प्रतिग्रहीता च काम एव—'कामो दाता कामः प्रतिग्रहीता' इत्युपनिषदुक्तेः। स च कामः रतिप्रियः। रतिरनुरागः। स च रक्तवर्णः, अत एव लोहितः। तदेवं शिव एव नीललोहितः सन् कामेश्वरः।

इयं च नीललोहितलीला शाकुन्तले प्रतीकैर्निपुणमुपन्यस्यते। तथा हि दुष्यन्तः शकुन्तलां प्रति, शकुन्तला च दुष्यन्तं प्रति नीलेनैव तत्त्वेनोन्मुखीक्रियेते। कृष्णशारो मृगः, भ्रमरश्च तावेव प्रतीकौ। पूर्वो दुष्यन्तापहारी, परश्च शकुन्तलापहारी। भ्रमरो हि वस्तुतो दुष्यन्तस्यैव शकुन्तलायौवनपुष्पे बम्भ्रममाणं मनः। कृष्णशारश्च तस्यैव मनसो विव-शतापरपर्यायाऽहैतुकी, अबोधपूर्वा च समुत्कण्ठा। अत एवासौ माढव्येन भर्त्स्यते 'एवं मृगयाविहारिणा त्वया भवितव्यमि'ति। ततश्च दुष्यन्तस्य मनस्तमोनिमग्नम्। दुष्यन्तं दृष्ट्वा सैव स्थितिः शकुन्तलाया अपि मनसः। तदपि तादृशमेव तमोनिबिडम्। इयमनयोः सुमानुषयोस्तमो-भूमिका। इमामधिरूढाविमौ साधारणीकृताविव जायेते। दुष्यन्तो राजत्वं विस्मरति, शकुन्तला च तपोधनत्वम्। इदानीमुभौ रजोनिमीलितौ जायेते लभेते च सर्वदमनम्।

इयमेव तमोमयी मनःस्थितिः विक्रमोर्वशीयेऽपि स्थितिमासादित-वती। तत्रापि—उर्वशी कृष्णेन केशिना हृता। तमसौ पुरूरवा जघान, किं कृत्वा, तस्यै स्वकीयं सौभाग्यं दत्त्वा, उक्त्वा च—

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यदृच्छया त्वं सकृदप्यवन्ध्ययोः पथि स्थिता सुन्दरि यस्य नेत्रयोः ।
त्वया विना सोऽपि समुत्सुको भवेत् सखीजनः किं पुनराप्तसौहृदः ॥

इत्येवं तां प्रति स्वमनसो विवशताम् । पुरूरवोहस्ताभ्याशमुपगतैवेयं मोहेन मुच्यमाना दृश्यते । यदुच्यते—

आविर्भूते शशिनि तमसा मुच्यमानेव रात्रि-
नैंशस्यार्चिर्हुतभुज इवच्छिन्नभूयिष्ठमूला ।
मोहेनान्तर्वरतनुरियं लक्ष्यते मुच्यमाना
गङ्गा रोधःपतनकलुषा गच्छतीव प्रसादम् ॥'

इति । स्पष्टमियं नीललोहितैवानुरागभूमिः ।

रघुवंशे दशरथः पुत्रलाभाय बद्धस्पृहः । अस्य मनसस्तमोभूमिः पुत्राश्रिता । तदुपायभूतं मुनिशापमसौ कृष्णशारेणैव प्राप्यते—

अथ जातु रुरोर्गृहीतवर्त्मा विपिने पार्श्वचरैरलक्ष्यमाणः ।
श्रमफेनमुचा तपस्विगाढां तमसां प्राप नदीं तुरङ्गमेण ॥ रघु० ९

रुरुरत्र कृष्णशार एव—'कृष्णशारो रुरुर्न्युङ्कुः' इति ।

सेयं नीललोहितभूः । इयमेव प्राकृतिकी मनःस्थितिः । इमामपरिहाय प्रवर्त्तमानस्यैव जीवनं फलेग्रहि, अनयैव च निश्श्रेयसमभ्युदयसोपानकम् । अत्रैव भुक्तिर्मुक्तिप्रसूः, अत्रैव च मुक्तिर्भुक्तिमाङ्गल्यविधृता । सोऽयं सनातनो जीवमार्गः । इयमेव [1]जीवनमुक्तिः, इयमेव च जीवन्मुक्तिः । अस्यैव दर्शनं रघोर्जीवने भवति यत्र तस्य पुत्रोऽभ्युदयमश्नुते स्वयं च सोऽपवर्गम् । यौगपद्येनैवेयमभ्युदयनिःश्रेयससिद्धिरुज्ज्वलतमा धर्मसिद्धिः । यदुच्यते—

इति शत्रुषु चेन्द्रियेषु च प्रतिषिद्धप्रसरेषु जाग्रतौ ।
प्रसितावुदयापवर्गयोरुभयीं सिद्धिमुभाववापतुः ॥

रघु० ८. २३

---

१. सीताचरिते [६. १३]—

मनुजवपुषि भुक्तिमुक्तिलक्ष्म्यौ विधृतविभक्तितयापि यत्र युक्ते ।
भरतभुवनसंस्कृतौ स्वमर्थं प्रतिजनजीवनमुक्तितमर्पयेते ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यस्मिन् गृहे पुत्रेष्वभ्युदयस्य पितृषु च निश्श्रेयसस्य समकालिकी प्रतिष्ठा किन्तु ततः परं भाग्यवत्तरत्वम्। ततश्च 'नीललोहितापरपर्यायमात्मभूदर्शनमिदं गार्हस्थ्यदर्शनमेव। अत एव च कालिदासः शृङ्गारकविः। किं न्वपरं शृङ्गार एष समाश्रयेत ऋते गार्हस्थ्यम्। स एष प्रशस्ततमो राजमार्गः। इदमेव शोभनं माङ्गलिकं च महायानम्।'

एवमस्माकं राष्ट्रकविः कालिदासो गार्हस्थ्येन पुनर्भवं क्षपयितुकामः, न तु तद्भिन्नेन केनचिद् वर्त्मना। गार्हस्थ्यदर्शी चैष राष्ट्रमाङ्गल्यस्य वैतालिकः। इत्थं कालिदासः सनातनस्य धर्मस्य, वैदिकस्य मार्गस्य, श्रुतिमहतश्चौपनिषदस्य दर्शनस्य प्रतिपालको महाकविः। अत एवासौ गोषु, हरिणीषु, वल्लरीषु, वनेषु, शाद्वलेषु, समुद्रेषु, श्वभ्रेषु, नदीषु, सागरेषु, मेघेषु, ज्योतिःषु, ऋतुषु, सन्ध्यासु, संक्रान्तिषु च बद्धभावः, अत एव चाष्टमूर्त्तिप्रियः, अत एव तेषु तेषु रसेषु गृहीतचषकः। अत एव च रससिद्धः कवीश्वरः।

कविकर्मणि सूक्ष्मता

इमामध्यात्मभूमिकामधिरूढ एवासौ कविकर्मणि सजते। अत एव शिवमपि वैवाहिकैर्मङ्गलसम्भारैः प्रसाधयति, पार्वतीमपि हरोपयाने त्वरयति, पशुपतिमपि च कामेन किञ्चित् परिलुप्तधैर्यं निरूपयति, पश्यति च प्राभातिकीषु वेलासु काञ्चिदद्वितीयामेव लीलाम्। तथाहि सूर्याचन्द्रमसोर्यौगपद्येन जायमाने व्यतिकरे दत्तदृष्टिर्माघो—

'उदयति विततोर्ध्वरश्मिरज्जावहिमरुचौ हिमधाम्नि याति चास्तम्।
वहति गिरिरयं विलम्बिघण्टाद्वयपरिवारितवारणेन्द्रलीलाम्॥'

इति यदा घण्टाद्वयपरिवारितं वारणेन्द्रं स्मरति, तत्रैव दत्तदृष्टिर्हरविजयकवी रत्नाकरश्च यदा [हरवि० १९. ५]—

अस्तावलम्बिरविबिम्बतयोदयाद्रि-
चूडोन्मिषत्सकलचन्द्रतया च सायम्।
सन्ध्याप्रनृत्तहरवाद्यगृहीतकांस्य-
तालद्वयेव समनृत्यत नाकलक्ष्मीः॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इत्येवं कांस्यतालद्वयेन नृत्यलग्नां कल्पनैकप्रसूतां नाकलक्ष्मीं संभावयति, श्रीहर्षश्च यदा कानीनात् कर्णात् प्रतिगृह्य देवेन्द्रेण प्राच्यै प्रेयस्यै दीयमानं सौवर्णं कुण्डलद्वयं [नै० १६. ४३]—

सुरपरिवृढः कर्णात् प्रत्यग्रहीत् किल कुण्डल-
द्वयमथ खलु प्राच्यै प्रादान्मुदा स हि तत्पतिः ।
विधुरुदयभागेकं तत्र व्यलोकि, विलोक्यते
नवतरकरस्वर्णस्रावि द्वितीयमहर्पतिः ॥

एवमुत्प्रेक्षते तदाऽस्माकं कालिदासः किञ्चिदन्यदेवोद्वीक्षते । महतोस्तेजसोर्युगपद्व्यसनोदयाविमौ लोकमिवात्मदशान्तरेषु नियमयतीति तद्दृष्टिः । शाकुन्तलस्य ऋषिकुमार उद्गिरति—

यात्येकतोऽस्तशिरं पतिरोषधीना-
माविष्कृतोऽरुण पुरस्सर एकतोऽर्कः ।
तेजोद्वयस्य युगपद् व्यसनोदयाभ्यां
लोको नियम्यत इवात्मदशान्तरेषु ॥ शा० ४. २

इयमात्मदशान्तरदर्शनदृगेव ऋषिदृष्टिः । लीलायागमिमं नित्यप्रवृत्तमभिवीक्षमाणा एव धन्याः, त एव धीराः, त एव च पुण्यवन्तः ।

माघो नारदवर्णनार्थं प्रथितयशाः । सोऽयमाकाशमण्डलादापतन्तं महतस्तेजसो राशिं नारदं प्रथममप्रत्यभिज्ञेयतया वर्णयति, वक्ति च—

गतं तिरश्चीनमनूरुसारथेः प्रसिद्धमूर्ध्वज्वलनं हविर्भुजः ।
पतत्यधो धाम विसारि सर्वतः किमेतदित्याकुलमीक्षितं जनैः ॥

इति । द्वारकावासिनोऽधः पतन्तीं विद्युतं कदाचिन्न जानन्ति ।

आगच्छँश्च गौरवर्णो नारदो वीणां, पिशङ्गीर्जटाः, मौञ्जीम् , विचित्रं चमूरुचर्म च बिभर्त्ति । तस्यास्य विचित्रवर्णतां माघो व्यसनिना बलरामेण, पशुना ऐरावतेन, जडेन पर्वतेन चोपमिमीते तैस्तैः पदार्थैर्विधृतविचित्रशोभेन । यथा चेत्थं तदधोदत्तैर्माघपद्यैः स्पष्टभूयिष्ठम्—

दधानमम्भोरुहकेसरद्युतीर्जटाः शरच्चन्द्रमरीचिरोचिषम् ।
विपाकपिङ्गास्तुहिनस्थलीरुहो धराधरेन्द्रं व्रततीततीरिव ॥ १. ५

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पिशङ्गमौञ्जीयुजमर्जुनच्छविं वसानमेणाजिनमञ्जनद्युति ।
सुवर्णसूत्राकलिताधराम्बरां विडम्बयन्तं शितिवाससस्तनुम् ।।

१. ६

निसर्गचित्रोज्ज्वलसूक्ष्मपक्ष्मणा लसद् बिसच्छेदसिताङ्गसङ्गिना ।
चकासतं चारु चमूरुचर्मणा कुथेन नागेन्द्रमिवेन्द्रवाहनम् ।।

१. ८

एतच्चात्यन्तमनुचितं यदसौ अमोघदर्शनं देवाष शरत्कालिकेन मेघेनाप्युपमिमीते मोघैकदर्शनेन—

विहङ्गराजाङ्गरुहैरिवायतैर्हिरण्मयोर्वीरुहवल्लितन्तुभिः ।
कृतोपवीतं हिमशुभ्रमुच्चकैर्घनं घनान्ते तडितां गणैरिव ।।

१. ७

कालिदासोऽप्येवंविधमेव नारदं पश्यति । विक्रमोर्वशीये नारदो नभोमण्डलात् पुरूरवसमुपैति । तत्र पुरूरवा केवलं तडित्सम्पातमेव संभावयति, न रविम् , न वाऽग्निम् । अन्यानि सर्वाण्यप्युपमानानानि विहाय केवलमेकमेवोपमानमत्राभिषिञ्चति साहृश्यपदे । तच्च कल्पवृक्षरूपम् । तत्र नारदस्य जटा, यज्ञोपवीतं चेति द्वितयमपि वर्णनविषयतया संगृह्यते, रक्ष्यते चौचित्यमपि निपुणम् । तथाहि—

राजा : किन्नु खलु निरभ्रे विद्युत्संपातः ।
ऊर्वशी : अहो भगवान् नारदः
राजा [निपुणमवलोक्य] अये भगवान् नारदः । य एष—

गोरोचनानिकषपिङ्गजटाकलापः संलक्ष्यते शशिकलामलवीतसूत्रः ।
मुक्तागुणातिशयसंभृतमण्डनश्रीर्हैमप्ररोह इव जङ्गमकल्पवृक्षः ।।

वि० ५. १६

क्व कल्पवृक्षः, क्व च शरत्कालिको मेघः, तत्सगोत्रा एव च गजादयः । अत्र सहृदया एव प्रमाणं यदुत किन्वेतेषु समुचितं तपोनिधेर्नारदस्य साहृश्यतुलामधिरोढुम् । एवमुपमाशिल्पे कालिदासो भावौचित्यं दिदृक्षते, माघश्च शब्दमात्रमैत्रीम् । एतच्चैतस्य प्रागुद्धृतेन 'निसर्गचित्रो-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ज्ज्वले०'—त्यादिना विशेषणसंयोजनाशिल्पेनैव स्पष्टम्। अस्मिन् पद्ये पक्षद्वयेऽपि एकस्यैव विशेषणस्य सामानाधिकरण्यमेव कला। कला च साधनम्। साध्यं भावः। साध्ये नष्टे किं नु तन्नाशकेन कलामात्रेण, चमत्कारिणापि सता। अस्ति चात्र सैव स्थितिः। गजात्मकेन पशुना सह देवर्षेः साम्येन भावौचित्यां नाशितायां 'विशेषणपदसाम्य'—मात्रे सिद्धेऽपि को नु गुणः काव्यकलायाः। तदिदं शिल्पं सदैव भ्रमणशीलता-मादाय कस्यचित् परिव्राजकस्य कुक्कुरेण क्रियमाणं साम्यशिल्पमनुजि-हीर्षति। एतच्च महतेऽनुपकाराय काव्यकलायाः।

एवमेव क्व पर्वतो महागात्रः, क्व च मुनिर्मानुषशरीरः। ततश्च मुनि-नाऽनेन धराधरेन्द्रस्यापि साम्यं क्रियते नु चमत्काराय कस्यचिदपि सुमेधसः सप्रज्ञकस्य। किन्त्वपराद्धं नारदेन माघपण्डितस्य यदसावेव-मिमं निर्भर्त्सयति, कदर्थयति, कलुषयति, तिरस्करोति च तैस्तैरनीदृशै-रुपमानैः। सर्वमिदं दूरतस्त्याज्यमिति महामतीनां काव्यलक्ष्मपरीक्षकाणां वामनप्रभृतीनां प्रणयः। यदुच्यत एतैः—

सूत्रम्—'हीनत्वाधिकत्वलिङ्गवचनभेदासादृश्यासम्भवास्तद्दोषाः ॥

[काव्यालङ्कारसूत्रम्] ४-२. ८

सूत्रम्—जातिप्रमाणधर्मन्यूनतोपमानस्य हीनत्वम् ॥ ४. २-६
वृत्तिः—जात्या प्रमाणेन धर्मेण चोपमानस्य न्यूनता तद्धीनत्वम्।

जातिन्यूनत्वरूपं हीनत्वं यथा—

'चाण्डालैरिव युष्माभिः साहसं परमं कृतम् ॥'

सू०—तेनाधिकत्वं व्याख्यातम्। ४. २. ११
वृ०—तेन हीनत्वेनाधिकत्वं व्याख्यातम्।
जातिप्रमाणधर्माधिक्यमधिकत्वम् ॥

प्रमाणाधिक्यरूपमधिकत्वं यथा—

पातालमिव नाभिस्ते स्तनौ क्षितिधरोपमौ।
वेणीदण्डः पुनरयं कालिन्दीपातसन्निभः ॥ इति।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यदि वा काव्यप्रकाशे श्रीमम्मटेन—

उपमायामुपमानस्य जातिप्रमाणगतं न्यूनत्वम् अधिकता वा तादृशी अनुचितार्थत्वं दोषः। [यथा—चाण्डालैरिवेत्यादि, पातालमिवेत्यादि च] —का. प्र. उ. १०. अन्तभागः

यद्वा रसगङ्गाधरे पण्डितराजेन—

'अस्याश्चमत्कारस्यापकर्षकं यावत् तत् सर्वमपि दोषः।
उपमानोपमेययोर्जात्या प्रमाणेन चाननुरूप्यम् आदि। यथा—

(१) मुनिः श्ववदयं भाति सततं पर्यटन् महीम्।
विनिवृत्तक्रियाजातः श्वापि लोके शुकायते॥

(२) सरसि प्लवदाभाति जम्बीरं सुपचेलिमम्।
आदिकारणतोयौघ इव ब्रह्माण्डमण्डलम्॥' इति
रसगं. २५६ पृ० नि० सा० ६

महतः पण्डितस्य माघस्य पर्वतेन नागेन्द्रेण च नारदस्योपमा इमामेव तां दोषलीलां विडम्बयति। किञ्च—

'दधानमम्भोरुहकेसरद्युतीर्जटाः शरच्चन्द्रमरीचिरोचिषम्॥

इति शिल्पने विरुद्धमतिकृत्त्वं दोषः। चन्द्रः कमलं चेति परस्परं विरुद्धौ। अत्र जटा कमलकेसरोपमाः नारदश्च चन्द्रोपमः। एतेन प्रतीयते यन्नारदस्य सर्वा अपि जटास्तस्य शिरःकपालकुहरे निलीनाः चन्द्रं दृष्ट्वा कमलस्य मुकुलितत्वात्, मुकुलिते च कमले केसराणां तद्गर्भतिरोहितत्वात्। आस्तां नामात्र पिङ्गत्वेन साम्यम्। तन्निष्पत्त्यनन्तरीय एवासौ वैयञ्जनिकस्तादृशोपमाघटितवाक्यार्थद्वयोद्गीर्ण उपमादोषः।

किञ्च का नामात्र नारदवर्णन एवंविधानामुपमानामावश्यकता। ऋतेऽपीमा विवक्षितार्थस्य निष्पत्तिर्न भवति किम्? पल्लवनमात्रमत्रोद्दिष्टम्। तच्च काव्ये महत्त्वमाधातुमकिञ्चित्करमेव। कालिदासस्योपमाः पुनः प्रकृतार्थसिद्ध्यङ्गभूताः। स्थालीपुलाकन्यायेनात्र पूर्वोद्धृतं कुशस्यैवोदात्तताया वर्णनमुपादेयम्। तत्र 'अनपोढार्गलमप्यागारं काचिद् योषित् प्रविशति'। न चैतद् व्यवहारतः शुद्धम्। उच्यते च कविना।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्यवहारविरुद्धस्यास्य बुद्धावसज्जमानस्यार्थस्य का नूपपत्तिः ? अस्त्युपपत्तिः। अवहितश्च तां प्रति स्वयं कविः। एतादृशी घटना व्यवहारेऽपि दृश्यते। स च व्यवहारो दैनन्दिनं प्रवृत्तः, सर्वसहृदयविदितः। को नु तादृशः सहृदयः यो दर्पणे स्वप्रतिबिम्बं न पश्यति। न भवति तत्र च्छिद्रम्। प्रविशति च कत्र द्रष्टा सर्वाङ्गीणम्। अत्र कानूपपत्तिः। अच्छिद्रे वस्तुनि बहिष्ठस्य वस्तुनः प्रात्यक्षिकः प्रवेशः। केयं स्थितिः। वस्तुतः प्रातिभमिदं दर्शनम्। प्रतिभा हिमालयेनापि विततश्रृङ्गोच्छ्रयेण गर्भिता भवति। न च भवति तत्रच्छिद्रम्। कालिदास आदर्शप्रतिभामिमामत्र उपनिबध्नाति—'अथानपोढार्गलमप्यगारं छायामिवादर्शतलं प्रविष्टाम्।' इति। स्थितमत्रोपमाया वाच्यसिद्ध्यङ्गत्वम्।

दशरथः पुत्रीयेष्टिप्राप्तं चरुं द्वाभ्यामेव देवीभ्यां प्रयच्छति कौसल्याकैकेयीभ्याम्। सुमित्रामसौ ताभ्यामेव सम्भावितां वाञ्छति तदंशद्वयांशद्वयप्रदानेन। क्रियते च ताभ्यां तथा। आदीयते च सुमित्रया सबहुमानमेव सपत्नीद्वयप्रदत्तं चरुद्वयम्। अस्त्येतद् अव्यावहारिकम्। एकापि सपत्नी शत्रुर्भवति, किं पुनर्द्वे। सौभाग्ये सपत्न्या विजयश्च कस्याश्चनापि सपत्न्याः सोच्छ्वासं मरणम्। पतिप्रेमैव सौभाग्यम्। तच्चात्र सपत्नीद्वयेनापहृतम्। पराजिता तत्र तृतीया सुमित्रा। अयं पुनरत्र गण्डोपरि पिटकः यदनयोर्हस्ताभ्यामिमामनुगृहीतां दिदृक्षते दशरथः। अथापि नास्ति सुमित्रायां क्षोभः। कीदृशीयं सपत्नी। सापत्न्यमत्र वर्त्तते न वा। यद्यस्ति तर्हि तया भवितव्यमेव क्षुभितया। न च भवति। ततश्चानुपपन्न एवात्र—

अर्चिता तस्य कौसल्या प्रिया केकयवंशजा।
अतः संभावितां ताभ्यां सुमित्रामैच्छदीश्वरः॥

रघु० १०. ५५

इति व्यवहारः। तदत्र का नामोपपत्तिः। अस्त्युपपत्तिः। कविरेव तत्र द्रष्टा, उपनिबद्धा च—

सा हि प्रणयवत्यासीत् सपत्न्योरुभयोरपि।
भ्रमरी वारणस्येव मदनिष्यन्दलेखयोः॥

१०. ५६

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति। सोऽयं स्थालीपुलाकः कालिदासोपमाशिल्पस्य वाच्यसिद्ध्यङ्गतायाः।

सादृश्यविधाने सा हि परा कोटिर्यत् प्राकरणिकेभ्य एवोपमानलाभः। कालिदासस्तामिमां कोटिं सौवर्णीं वासयष्टिं कार्त्तिकेयमयूर इवातिष्ठति। तथाहि—दिगन्तराणि सञ्चारपूतानि कृत्वा दिनान्ते पल्लवरागताम्रा मुनिधेनुः निलयाय गन्तुं प्रक्रमते। तत्रोपमानं पतङ्गप्रभा। साऽपि तत्रैव प्रस्तुता। यदि वा दिनान्ते वर्णयितुमिष्टा पतङ्गप्रभा। तत्रोपमानं धेनुः। सापि तत्रैव प्रस्तुता। अत्र कालिदासस्योक्तिः—

सञ्चारपूतानि दिगन्तराणि कृत्वा दिनान्ते निलयाय गन्तुम्।
प्रचक्रमे पल्लवरागताम्रा प्रभा पतङ्गस्य मुनेश्च धेनुः॥ इति,
पुरस्कृता वर्त्मनि पार्थिवेन प्रत्युद्गता पार्थिवधर्मपत्न्या।
तदन्तरे सा विरराज धेनुर्दिनक्षपामध्यगतेव सन्ध्या॥' —इति च।

उत्खातप्रतिरोपिता आपादपद्मप्रणताश्च वङ्गाः शरदि रघुं फलैः सम्बर्धयन्ते। तत्रोपमानं कलमाः। ते चापि शरदि वङ्गेषु प्रकामं प्ररूढाः आपादपद्मप्रणता उत्खातप्रतिरोपिताश्च। यदुच्यते—

आपादपद्मप्रणताः कलमा इव ते रघुम्।
फलैः संवर्धयामासुरुत्खातप्रतिरोपिताः॥

प्रक्रान्तद्वयोपमा संस्कृतकतीनां प्रेष्ठं शिल्पम्। बाणभट्टः पुष्यभूतिप्रसङ्गे वयं च वाल्मीक्याश्रमसन्ध्यावर्णने तथैव प्रवृत्ताः। एवमत्र वयम्—

अवनिरुहशिखासु सान्ध्यमोजः शलभसमूह इवाश्रयं विलेभे।
उटजपरिसरे च दीपलक्ष्मीर्गृहहरिणीव रुचिं परां बभार॥

सीताचरिते—७. ४५

कालिदासः प्रबोधमङ्गलक्षणे चराचरस्य प्राभातिकीं सुषमां माध्वीमिव षट्पद आकण्ठं पिबति। तत्रासौ प्रबोधयितुमिष्टे जनेऽदत्तदृष्टिर्न प्रवर्त्तते। वर्णनीयेष्वप्रासङ्गिकेषु वस्तुष्वसौ प्रासङ्गिकं न जहाति। श्रीहर्षस्तु न तथा। स हि प्रबुबोधयिषितमेव विस्मरति, अप्रस्तुतमेव भृशमधिश्रयति। उदाहरणमत्र पद्मवर्णनम्। कालिदासः पद्ममन्तः प्रचलितभ्रमरं वीक्ष्यान्तःप्रचलिततारमजनेत्रं तेनोपमेयोपमाविधयोपमि-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मीते-'तद् वल्गुने'त्यादिना पूर्वमुद्धृतेन पद्येन। श्रीहर्षः पुनस्तार्किकतयाऽस्या एव खण्डनोन्मुखे संसाधने एवं प्रवर्त्तते—

यत् पाथोजविमुद्रणप्रकरणे निर्निद्रयत्यंशुमान्
दृष्टीः, पूर्णयति स्म यज्जलरुहामक्ष्णां सहस्रं हरिः।
साजात्यं सरसीरुहामपि दृशामप्यस्ति तद् वास्तवं
यन्मूलाऽऽद्रियतेतरां कवितृभिः पद्मोपमा चक्षुषः॥

अत्र नायकनेत्रयोर्नामापि नास्ति।

कालिदासस्य वाहाः प्राभातिके क्षणे सैन्धवशिलाशकलानि लिहन्ति—

दीर्घेष्वमी नियमिताः पटमण्डपेषु
निद्रां विहाय वनजाक्ष वनायुदेश्याः
वक्त्रोष्मणा मलिनयन्ति पुरोगतानि
लेह्यानि सैन्धवशिलाशकलानि वाहाः॥

५. ७३

अत्राश्वाः प्रबुद्धाः, सैन्धवशिलाशकलानि लिहन्ति, मलिनयन्ति च तस्मिन् व्यतिकरे ताः शिला इति वाक्यार्थे लवणलेहनमेव प्रधानमिति स्फुटम्। नैषधकविरत्राश्वानेव वाक्यार्थीकरोति, तेषां प्राभातिकीं लवणलेहां हेलयैव प्राधान्याद् विच्यावयति। यथा—

निशि निरसनाः क्षीरस्यन्तः क्षुधाश्वकिशोरका
मधुरमधुरं हेषन्ते ते विलोलितवालधि।
तुरगसमजः स्थानोत्थायं क्वणन्मणिमन्थभू-
धर-भव-शिला-लेहा-हेलाचणो लवणस्यति॥

१६. १८

अत्र 'क्षीरस्यति, लवणस्यति, स्थानोत्थायम्' इति प्रयोगाः, सानुप्रासानि च नृत्यन्तीव पदानि पाठकस्य रसनां स्खलितगतिकां दोलाधिरोहणनेदिष्ठां च विदधति, तथापि विद्वांसं नलमेवैतानि प्रीणयन्ति, न तु तस्य निरतिशयप्रेमास्पदभूतां वैदर्भीमपि। नलमप्यत्रैतानि पदानि प्रायेण गौडीचिकीर्षन्ति। अत्रेत्थमिव किञ्चित् प्रतिभाति यत् कविरसौ 'अश्व-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

क्षीरवृषलवणानामात्मप्रीतौ क्यचि' [पा० सू० ७. १. ५१] इति पाणिनिसूत्रम्, 'क्षीरलवणयोर्लौलसायामि'-ति कात्यायनशास्त्रं च तदुत्तीर्णैः प्रयोगैः संभावयितुमेव कविकर्मणि प्रवृत्तः । अतएव १६. १७ पद्येऽसौ सूत्रस्यास्यावशिष्टानपि प्रयोगान्निपुणं जुगुम्फ—

'रविरथहयानश्वस्यन्ति ध्रुवं वडवा बल-
प्रतिबलबलावस्थायिन्यः समीक्ष्य समीपगान् ।
निजपरिवृढं गाढप्रेमा रथाङ्गविहङ्गमी
स्मरशरपराधीनस्वान्ता वृषस्यति सम्प्रति ॥
१६. १७

यद्यपि नमस्य एवासौ महामेधा नैपुण्यातिभूमिमाटीकमानः, अथापि कविकर्मणो या काचन पिच्छलतानाम्नी पद्मिनी तामसौ मदमलिनकपोलः स्तम्बेरम इवोत्खाय चिचर्वयिषति ।

कालिदासस्य वन्दिनः [1]सूतात्मजा [2]वन्दिपुत्राश्च । श्रीहर्षस्य च वन्दिनो वैतालिका[3] नग्नाचार्यश्च । अयमर्थो यत् श्रीहर्षस्य वैतालिकाः स्वकर्मणि विश्वविद्यालयकक्षासु लब्धस्नातकोत्तरोपाधयः स्नातकाः, कालिदासस्य च ते पितृपितामहादागतानां परम्पराणां मर्यादानां च वेत्तारो विनीताः शास्त्रिणः । अतएव कालिदासस्य वैतालिकाः स्वकर्मणः कालावधिं जानन्ति, सूर्योदयात् पूर्वं यावदेव च ते प्रबोधमङ्गलमाचरन्ति । श्रीहर्षस्य तु ते सूर्योदयात् परस्तादपि चिकविषन्तः स्ववाचो विजिग्लापयिषवो दृश्यन्ते । अतएव श्रीहर्षस्य पद्मानि पूर्णतो विकसितानि जायन्ते, सूर्यस्य कराश्च घुसृणमसृणतां संत्यज्य दिवाकीर्तेर्नापितस्य क्षुरा इव तीक्ष्णाः जायन्ते, तत्र सूक्ष्माणि रजांस्यपि विलोक्यन्ते । तथाहि—

गतचरदिनस्यायुर्भ्रंशे दयोदयसंकुचत्-
कमलमुकुलक्रोडान्नीडप्रवेशमुपेयुषाम् ।
इह मधुलिहां भिन्नेष्वम्भोरुहेषु समायतां
सह सहचरैरालोक्यन्तेऽधुना मधुपारणाः ॥ १६. ३०

---

१. रघु० ५. ६५ । २. रघु० ५. ७५ । ३. नैषध १९. १ ।
४. नैषध १९. २१ ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बहुनखरता येषामग्रे खलु प्रतिभासते
कमलसुहृदस्तेऽमी भानोः प्रवालरुचः कराः ।
उचितमुचितं जालेष्वन्तः प्रवेशिभिरायतैः
कियदवयवैरेषामालिङ्गिताङ्गुलिलङ्गिमा ॥

१९. ५३

नय नयनयोर्द्राक्पेयत्वं प्रविष्टवतीरमू-
र्भवनवलभीजालान्नाला इवार्ककराङ्गुलीः ।
भ्रमदणुकणक्रान्ता भान्ति भ्रमन्त्य इवाशु याः
पुनरपि धृताः कुन्दे किंवा न वर्धकिना दिवः ॥

१९. ५४

दिनमिव दिवाकीर्त्तिस्तीक्ष्णैः क्षुरैः सवितुः करै-
स्तिमिरकबरीं लूनां कृत्वा निशो निरधारयत् ।
स्फुरति परितः केशस्तोमैस्ततः पतयालुभि-
र्ध्रुवमधवलं तत्तच्छायच्छलादवनीतलम् ॥

१९. ५५

दिनमुद्गतम्, प्रबोधमङ्गलं चाचर्यमाणमेवास्त इति कोऽयं क्रमः । मन्ये श्रीहर्षो राजधान्यां प्रबोधमङ्गलमाचरति, कालिदासश्च यात्रावसतौ, तथापि राज्ञामिदं मङ्गलम्, यात्रावसतिष्वपि तदन्यादृशतां न यायात्, अन्यथा तु तत्रेतरजनसाधारण्यमेव सिद्ध्येत्, न राजत्वम् ।

श्रीहर्षो वसन्ततिलकस्य स्थाने हरिणीं चिनोति । सोऽयमवश्यमेवास्य स्तुत्यः क्रमः, प्रातःकालेऽसौ वेदपाठमग्निहोत्रं च स्मरति, एतदपि वाराणसीवासिनोऽस्य प्रशस्यमेव, कालिदासः प्रातःकाले चक्रवाकाभ्युदयमत्र विस्मरति, श्रीहर्षस्तु तमपि—

धयतु नलिने माध्वीकं न वाभिनवागतः
कुमुदमकरन्दौघैः कुक्षिम्भरिर्भ्रमरोत्करः ।
इह तु लिहते रात्रीतर्षं रथाङ्गविहङ्गमा
मधु निजवधूवक्त्राम्भोजेऽधुनाऽधरनामकम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इत्यादिभिस्तिसृभिर्हारिणीभिर्हरिणीभिरुपनिबध्नाति । कालिदासोऽत्र कुमुदिनीनां हर्षग्लानिममङ्गलमिव परिहरति। श्रीहर्षः पुनस्तामपि बहुश उपाददाति। तत्रैव च पुनरुक्तभूयिष्ठार्थकं पद्यमिदं निबध्नाति—

सरसिजवनान्युद्यत्पक्षार्यमाणि हसन्तु न
क्षतरुचिसुहृच्चन्द्रं तन्द्रामुपैतु न कैरवम्।
हिमगिरिदृषद्दायादश्रि प्रतीतमदः स्मितं
कुमुदविपिनस्याथो पाथोरुहैर्निजनिद्रया ॥

यदेव कैरवम्, तदेव कुमुदम्। प्रतीतपदञ्च विनिमयार्थेऽवाचकम्।

कालिदासस्य वैतालिका उचितानुचितविवेकिनः। राजाज्ञापत्रविषयनिबद्धार इवेमेऽव्यर्थमेवावसरौचितीसुभगमेव च विषयमत्रोपस्थापयन्ति। श्रीहर्षस्य वैतालिकाः सूनाध्यक्षा इवान्यादृशमपि क्रूरभूयिष्ठं हिंसार्थकलुषितमपि विषयमुपाददते। 'महाराज प्राभातिकीं सुषमामिमामरुणोदानात् सफलयतमामि'-त्युक्त्वा यत् प्रथममुपन्यस्यन्ति तत् 'चन्द्रस्य विगतवासस्त्वं'-'निरंशुकं तुहिनमहसं पश्यन्तीव हरेर्महिषी हरित् प्रसादमिषान्निजमुखं स्मेरं धत्ते'-इति तृतीयेनैव पद्येन। इतः परं चन्द्रत्विषां दरिद्राणता, तिमिरस्तोमस्य पञ्चप्रपञ्चता, प्रालेयाम्भसां रजनिवमथुत्वम्, मायामय्याः सीताया रावणिनेव रविणा रात्रेर्हिंसा, त्रिदशमिथुनक्रीडातल्पे विहायसि च ग्रहसंग्रहस्य मैथुनधुतस्रग्भारश्रीभरत्वम्। अप्येते शिष्टजनोचिता अर्थाः, विशेषेण प्रभातमङ्गले।

रविकिरणव्रातः श्येनः, ध्वान्तं ध्वाङ्क्षः, ताराश्च पारावताः। ततश्च ध्वान्तध्वाङ्क्षप्रमापणपटुं रविकिरणव्रातश्येनं दृष्ट्वा तारापारावता उड्डीयन्ते। तदत्र श्रीहर्ष इव तर्कचतुरश्चन्द्रोऽपि 'यत्र यत्र श्येनपातस्तत्र तत्प्रेषको मृगयुरि' ति व्याप्त्या मृगयुसंपातमुत्प्रेक्ष्य स्वशशसंरक्षणाय झटित्यपैति। को नामात्र मृगयुः। ननु प्रभातकाल एव। एवं चोपस्थितं सकलानौचित्यास्पदं माङ्गलिकस्य प्रभातकालस्य वधिकत्वरूपं मृगयुत्वम्।

प्रातःकाले को नु स्मरेत् दैत्यगुरुं शुक्रम्। श्रीहर्षस्तमपि न त्यजति। तमप्यसौ वर्णयतितरां पौराणिकेन कचाख्यानेन [नै० १६. १५]। इदमत्र सान्निपातिकं स्नानं यदसौ तमसि कचत्वमारोपयति। क्व पुण्यलक्षणः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कचः, क च नितान्तमपुण्यं तमः। अथवा निर्वर्णितपतिव्रताभगस्य [नै० ६. ६१] अस्य महात्मनः समुचितमेवेदं सर्वथा। कविवृषभस्यास्य कोपे कदाचिन्नास्त्येव वराकोऽनौचित्यशब्दः।

स्वयंवरवर्णने कालिदासं सुदूरमनुहरति श्रीहर्षः। किन्तु तत्राप्यसावौचितीसुरभिं हिनस्त्येव ससंरम्भम्। सुनन्दा श्यामवर्णेन पाण्ड्यनृपेण गौरवर्णाया इन्दुमत्या योगमसदृशं पश्यति। तदिदमसादृश्यमसावभिव्यज्य न तिष्ठति, किन्तु तथा व्यञ्जयति यथौचित्यकञ्चुकं नाच्छिद्यते। मेघे विद्युतमिव तस्याङ्के तामिमामिन्दुमतीं वाचकत्वव्यापारेणारुचिरामसाधयन्त्यपि पर्यायोक्तभङ्ग्या तादृशीं साधयन्त्यसौ ब्रूते [रघु० ६. ६५]—

इन्दीवरश्यामतनुर्नृपोऽसौ त्वं रोचनागौरशरीरयष्टिः।
अन्योन्यशोभापरिवृद्धये वां योगस्तडित्तोयदयोरिवास्तु॥

श्रीहर्षोऽसादृश्यमिदं गालिभिरिवैवं वमति [नै० १२. २१]—

'शशंस दासीङ्गितविद् विदर्भजामितो ननु स्वामिनि पश्य कौतुकम्।
यदेष सौधाग्रनटे पटाञ्चले चलेऽपि काकस्य पदार्पणग्रहः॥'

एतावन्मात्रेणावमानेनातुष्ट एष भूयोऽपि ब्रवीति [नै० १२. २२]—

ततस्तदप्रस्तुतभाषितोत्थितैः सदस्तदश्वेति हसैः सदःसदाम्।
स्फुटाजनि म्लानिरतोऽस्य भूपतेः सिते हि जायेत शितेः सुलक्ष्यता॥

एकेन सर्गेण मानुषीगिरा समापितस्वयंवरवर्णनं कालिदासं जिगीषुरिव श्रीहर्षः—सकलशास्त्रमूर्त्तिसरस्वतीवचोभिः सर्गपञ्चकेन स्वयंवरं वर्णितवानपि न ह्येवानर्ज साफल्यम्, मिष्टशिष्टताया अभावात्।

श्रीहर्ष उत्प्रेक्षाकविः, कालिदासश्चोपमाकविः। उपमायां सादृश्यं वाच्यं भवति, उत्प्रेक्षायां च व्यङ्ग्यम्। वाच्यापेक्षया व्यङ्ग्यस्य चमत्कारः सातिशयो भवति। एवं च कालिदासापेक्षया प्राप्तमेव तावत् श्रीहर्षस्य सातिशयत्वम्। किन्तु वस्तुस्थितिरेतादृशी नास्ति। वस्तुतः उपमाऽनुभूतिविधृता भवति, उत्प्रेक्षा च कल्पनाश्रिता। एवं चोपमाया उपनिबन्धे यावाननुभवोऽपेद्यते न हि तावानुत्प्रेक्षायाः। भवति चोप-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मायामपि व्यङ्ग्यसम्पत्तिः, भवति च तस्याश्चमत्कारित्वमपि भूयस्तराम्। एवं चानुभव एव वरीयान् कल्पनापेक्षया। चमत्कारश्चोभयसाधारण इति न विनिगमकः प्राधान्यनिर्णये।

वस्तुतः कालिदासो लोकशास्त्रोभयव्युत्पत्त्या तत्समकोटिकेन काव्यकरणाभ्यासेन च समेधितां प्रतिभामार्षेण युगदर्शिना हृदयनेत्रेण समेधयति, श्रीहर्षस्तु शास्त्रव्युत्पत्तौ द्रढीयानपि लोकप्रतिपत्तौ दुर्बलः उपेक्षितकाव्यशास्त्राभ्यासश्च प्रतिभामात्रमाश्रयति, नास्ति तत्र कविकर्मणि लोकोपकारकत्वमप्याद्धानं तथाविधमार्षं चक्षुः। अन्यथा यवनाक्रमणकाले दमयन्तीशृङ्गारेणैवासौ न ह्येव संतुष्येत्। किमधि केन महाकाव्यपु कालिदास एवैको कनिष्ठिकाधिष्ठितः। अत एवावोचाम—

कवीनामन्वये शुद्धे प्रसूतः शुद्धिमत्तरः।
कालिदासकविः श्रीमानिन्दुः क्षीरनिधाविव ॥' इति,

बाणो वाण्याश्चरणरणितं नूपुरं, दण्डपादो
माघो, दण्डी कटितटरणत् किङ्किणीचक्रवालम्।
पिण्डीबन्धश्चलतरलयोर्हस्तयोर्हारपुत्रः
क्रीडाशैलद्वयमुरसि यत् तत् तु नः कालिदासः ॥'

इति च ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.